नं० ६४३-च
वेदान्तसार: (वेदान्तशास्त्रम्)
विद्वन्मनोरञ्जनी टीका सहित;
पत्राणि ४७ (सम्पूर्णम्)
लिपिकः रामतीर्थ यति:

नं० ६४३-घ

नं० ६४३-घ

(वेदान्तशास्त्रम्) वेदान्तसारः विद्वन्मनोरञ्जनीटीका सहितः

पत्राणि ४८ (सम्पूर्णम्)

नं० ९४२-घ

लिपिकः रामतीर्थ यतिः

वेदान्त

वेदांतसारटीकाविद्वन्मनोरंजिनी प-४७

वे॰सा॰ टी॰ १

ॐ श्रीगणेशाय नमः। सत्यं ज्ञानमनंतं परिपूर्णानंदविग्रहं रामं। प्रत्यंचमनन्तविश्वस्थितिलयपूर्वं वंदे॥१॥ वाणीकायमनोभिः श्री
गुरुविद्यागुरून्नमस्कृत्य वेदांतसारटीकां कुर्वेऽज्ञावप्राह्यथाबुद्धि॥२॥ चिकीर्षितस्य ग्रंथस्याविघ्नपरिसमाप्तिप्रचयगमनशिष्टाचार
परिपालनफलविशिष्टशिष्टाचारानुमितस्मृतिपरिकल्पितश्रुतिबोधितकर्तव्यताकं स्वाभिमतदेवतातत्त्वानुसंधानात्मकं मंग
लमाचरति। अखंडेत्याद्यश्लोकेन। आत्मानमाश्रये इत्यन्वयः। यद्यपि ग्रंथकरणादिकार्यारंभे गणेशसरस्वत्यादिदेवताभेदं विघ्न
विघातकं विद्यास्फूर्तिप्रदत्वेन प्रसिद्धमनुसंधानं कुर्वंति विशिष्टास्तथाप्येष उ ह्येव सर्वे देवा इति श्रुतेरात्मन एव सर्वदेवतात्मक
व६ त्वावगमादात्मानुसंधाने सति सर्वदेवतानुसंधानं संभवतीति मन्यते ग्रंथकारः। आत्मानं विशुद्धचिद्रूपं त्वंपदलक्ष्यं तुरीयमाश्रये॥

ॐ श्रीगणाधिपतये नमः। अखंडं सच्चिदानंदमवाङ्मनसगोचरं॥
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये॥१॥

शास्त्राचार्यप्रसादाभिव्यक्तमनुसंदधे। आत्मनस्तत्पदलक्ष्यपरमात्मानन्यत्वे वाक्यार्थं कथयितुं तत्पदार्थं शोधयति। अखंडस
च्चिदानंदमिति। आनंदादयः प्रधानस्येति न्यायेन सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदं ब्रह्मेति श्रुत्योः परस्परैकवाक्यतामभिप्रेत्याखंडे
८ त्यादिविशेषणपदस्य समासः। अखंडशब्दोऽनंतपदपर्यायः। स चाविद्याध्वस्तदेशकालवस्तुभ्यः परमात्मनः परिच्छेदं व्यावर्तयत्येव नञ्पद
योगात्। तदुक्तं तत्रानंतोऽन्तवद्वस्तुव्यावृत्त्यैव विशेषणमिति। इतराणि तु पदानि स्वार्थापरित्यागेनैव स्वविरोधिव्यावर्तकत्वं ब्रह्म लक्षयं
ति। तदुक्तं स्वार्थार्पणप्रणाड्या च परिशिष्टौ विशेषणमिति। परिशिष्टौ सत्यज्ञानशब्दावित्यर्थः। अखंडमपि तदनंतमसत्त्वं वा स्या
दित्यत आह। सदिति। सदनंतमसत्त्वव्यावृत्तं बाधाभावोपलक्षितस्वरूपसत्तात्मकमिति यावत्। ब्रह्मणोऽप्यनंतत्वे। ॥ ॥ ॥ रामः

निरंशस्य नाशे प्रसंगात्। शून्यस्य स साक्षिकत्वे तु सर्वशून्यवादानुपपत्तेः। असाक्षिकत्वे तु तदसिद्धेः। स्वप्रकाशत्वे च ब्र
ह्मण एव नामांतरत्वापत्तेर्नैव ब्रह्मान्यत् शून्यं वेत्यर्थः। अखंडं तु यदपि तत्तमो वक्तुं किं न स्यादित्यत आह। चिदिति। चित् ज्ञा
नं ज्ञप्तिरिति पर्यायः। श्रुतौ ज्ञानं ब्रह्मेति सामानाधिकरण्यात्। गुणत्वे तस्य तदनुपपत्तेः। ननु शुक्लो घट इतिवत् तत्स्यादिति वाच्यं।
निर्धर्मकत्वप्रतिपादकास्थूलत्वादिश्रुतिविरोधात्। किंच ज्ञानस्यानित्यत्वेऽप्यनुभवत्वसंवित्प्रकाशवच्च ब्रह्मस्वभावानतिरेकात्।
अनागमापायिधर्मस्य धर्मिणः परमार्थतो भिन्नत्वे प्रमाणाभावात्। अनित्यत्वे ज्ञानानवस्थाप्रसंगात्। कार्यस्य सतो ज्ञानस्यापि का
न ६ र्यांतरवत् स्वोपादानगोचरापरोक्षज्ञानजन्यत्वात्। ज्ञानोपादानब्रह्मगोचरस्यापि ज्ञानस्य कार्यत्वे तस्यापि पूर्वसमानयोगक्षेमत
तया कथं नानवस्था। अजन्यत्वे पृथमेकः प्रद्वेषः। तथा च सिद्धा ब्रह्मणो ज्ञानस्वभावता। एतेन जीवात्मनोऽपि ज्ञानस्वभावता
व्याख्याता वेदितव्या। स्वप्रकाशं चैतद्ब्रह्मैव यं अप्रकाशजडविलक्षणत्वनिर्देशसामर्थ्यात्। तद्देवा ज्योतिषां ज्योतिः तस्य
भासा सर्वमिदं विभातीत्यादिश्रुतेः। नन्वेवमखंडसच्चिद्रूपमपि ब्रह्म न प्रेक्षावत्प्रेक्षागोचरः। सुखदुःखाभावतत्साधनानामन्यत
मत्वाभावात्। न तावत्स सुखदुःखाभावसाधनं ब्रह्म। स्वस्मिन् सुखदुःखयोर्नित्यनिवृत्तत्वात्। अशरीरं वाव संतं न प्रियाप्रिये स्पृशत
इति श्रुतेः। नाप्यन्यगतसुखादिसाधनं ब्रह्म। अन्येषां दृष्टादृष्टसुखदुःखप्राप्तिपरिहारयोर्लौकिकवैदिकसाधनेभ्य एव सिद्धेः। तस्मान्न
सुखादिहेतुसाधनं ब्रह्म। नापि दुःखाभावरूपं। भावात्मस्वभावताविरोधात्। नापि सुखात्मकं तथात्वे प्रमाणाभावादित्यत
आह। आनंदमिति। आनंदं सुखरूपं। न च ब्रह्मण आनंदात्मकत्वे प्रमाणाभावः। विज्ञानमानंदं ब्रह्म आनंदो ब्रह्मेति व्य
जानात्। आनंदरूपममृतं यद्विभाति को ह्येवान्यात् कः प्राण्यात् यदेष आनंदो न स्यादित्यादिश्रुतेः प्रमाणत्वात्। ना
चानंदं ब्रह्मणो धर्म इति धर्मिताशंकाप्यवकाशं लभते। श्रुतिस्वारस्यभंगप्रसंगात्। न च ब्रह्मण ईश्वरस्य

वे॰ सा॰ खिलत्वं परैरपीष्यते। अतश्चानंदो विद्यते यस्मिन्नित्यानंदं ब्रह्मेति परेषां श्रुतिव्याख्यानमुपहासास्पदमेव। न च ब्र
टी॰ ह्मण्यानंदशब्दो दुःखाभावपरः। आनंदो ब्रह्मेति व्यजानादिति भावरूपब्रह्मसामानाधिकरण्यनिर्देशविरोधात्।
२ नच वै प्रियास्पर्शत्वश्रुतिविरोधः। तस्या वैषयिकप्रीतिनिषेधपरत्वादिति भावः। यद्यप्यात्मपदमेवेह शेषिपदं तथापि श्रुत्युप
२ रोधात्पदार्थशोधनार्थं तथा च ब्रह्मपदमध्याहृत्य विशेष्यं बोद्धव्यं। एवं सत्यखंडसच्चिदानंदब्रह्मात्मानमाश्रय इति।
ब्रह्मात्मपदयोः सामानाधिकरण्येन तत्त्वंपदार्थयोरैक्यं वाक्यार्थोऽब्रह्मत्वपारोक्ष्यनिवृत्त्या परिपूर्णतया निरूपितः स्यान्नान्य
ते था। एषां च पदानां ब्रह्मपदेन प्रत्येकं प्रथममन्वितानां पश्चात्सामानाधिकरण्येन परस्परमपि संबंधसिद्धेः अरुणया पिंगाक्ष्या
गवैकहायन्या सोमं क्रीणातीत्यत्रैकवाचिपदान्वितानामरुणादिपदानामिव परस्परान्वयः। न चैकार्थत्वे सत्यादिपदानां
पर्यायतापत्तिरयोगपद्यं चेति वाच्यं प्रवृत्तिनिमित्तभेदाद्व्यावर्त्यभेदाच्चोक्तदोषानवतारात्। एवमन्योपि वाक्यविचारोपयो
गीन्याय ऊहनीयो विस्तरभियानेह लिख्यते। एवं विधिमुखेन परिछिन्नानृतजडदुःखरूपानात्मतद्धर्मविलक्षणं ब्रह्मेति।
निरूप्येदानीं नेति नेत्यस्थूलं यतो वाचो निवर्त्तते अप्राप्य मनसा सहेत्यादिश्रुतिमाश्रित्य निषेधमुखेन सकलनिषेधा
वधिभूतं सत्यस्य सत्यं ब्रह्मेति दर्शयति। अवाङ्मनसगोचरमिति। वाक् च मनश्च वाङ्मनसे तयोर्गोचरो वाङ्मनसगोचरः
रो न वाङ्मनसगोचरोऽवाङ्मनसगोचरस्तदिति विग्रहः। नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा अस्तीत्येवोपलब्ध
व्य इति च काठकश्रुतेः। एवं विधिनिषेधाभ्यां ब्रह्मणः स्वरूपलक्षणमभिधाय लक्षितं स्वरूपं तटस्थलक्षणेन संभा
वयति। अखिलाधारमिति। अखिलस्याकाशादिप्रपंचस्याधारमाश्रयस्तदिति विग्रहः। आश्रयशब्दः सृष्टिप्रलय रामः

योरप्युपलक्षणार्थः। तथा च श्रुतिः। यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मे
ति। ततश्च जगदुत्पत्तिस्थितिलयकारणं ब्रह्मेत्युक्तं भवति। अतइदं फलितं सत्यज्ञानानंतानंदैकरसं ब्रह्म तत्पदलक्ष्यमिति। आत्मपदा
देव त्वंपदार्थशुद्धिः। आत्मेत्येवोपासीतात्र ह्येते सर्वे एकीभवंतीति श्रुतावात्मशब्दस्य निर्विशेषप्रत्यक्चैतन्यमात्रनिष्ठतया निर्धारित
त्वात्। तथा च ब्रह्मात्मपदयोः सामानाधिकरण्यादैक्यवाक्यार्थसिद्धिरित्युक्तं। तदेवं वाक्यार्थभूतमात्मानमाश्रयेऽकिमर्थमभीष्टसिद्धये। अभी
ष्टशास्त्रार्थाप्रतिपत्त्यन्यथाप्रतिपत्तिविप्रतिपत्तिनिरासलक्षणं यथाशास्त्रमर्थसंग्रहसामर्थ्यलक्षणं च तस्य सिद्धिः संपत्तिस्तस्यै तदर्थमित्य
र्थः।१। एवं शास्त्रप्रतिपाद्यपरदेवतातत्त्वानुस्मरणलक्षणमंगलं विधायेदानीं यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ इत्यादिशास्त्राद्देवताभ

अर्थतोऽप्यद्वयानंदानतीतद्वैतभानतः। गुरूनाराध्य वेदांतसारं वक्ष्ये यथामति।२।

क्तिवद्गुरुभक्तेरपि विद्यांगत्वप्रतीतेर्देवमिवाचार्यमुपासीतेत्यादिस्मृतेश्च गुर्वाराधनोक्तिपूर्वकं स्वचिकीर्षितं प्रतिजानीते। अर्थतइति।
श्लोकेनावेदांतो वक्ष्यमाणलक्षणस्तस्य सारं मथितार्थस्तं वक्ष्ये। तच्च यथामति स्वमत्यनुसारेण न तु शास्त्राप्रवितततस्यातिगंभीरार्थस्य वे
दांतस्याशेषबुद्धिभिरपरिच्छेद्यत्वात्। तदुक्तमभियुक्तैः गुरुचरणसरोजसन्निधानादपि वयमस्य गुरोः कलेशभाजः। अपि महति ज
लार्णवे निमग्नाः सलिलमुपाददते मितं हि मीनाः इति। एतच्च गर्वपरिहारोक्तिवचनं न पुनर्वादिभयनिमित्तं यथाशास्त्रमर्थ
संग्रहादित्यर्थः। किं कृत्वा गुरूनाराध्य भक्तिश्रद्धातिशयस्तुतिनमस्कारादिना देवमिव पूजयित्वा गुरूनित्येकस्मिन्नपि बहुव
चनं पूजार्थं। किं नामानो गुरवऽइत्यपेक्षायां स्वस्य संप्रदायिकत्वज्ञापनाय तान्नामतो निर्दिशति। अद्वयानंदानिति। नाम्नो

वे॰ सा॰ टी॰ ३

3

डिण्डिमादिवत्संज्ञामात्रत्वं व्यावर्तयति। अथेतदिति। अपिशब्दः शब्दार्थयोः समुच्चयार्थः न केवलं शब्दतः किंत्वर्थतोऽपीति। तत्र हेतुः। अतीताद्वैतभानत इति। अतीतेद्वैते यस्मात्तदतीताद्वैतं प्रत्यगात्मतत्त्वं तस्य भानं साक्षात्कारस्तस्मादतीताद्वैतभानतः। अतीताद्वैतभावत इति पाठे तत्त्वज्ञानविध्वस्ताखिलभेदब्रह्मात्मत्वादित्यर्थः॥ ब्रह्मात्मप्रतिपत्तिपरेषु श्रुतिसूत्रेषु विद्वन्निर्मितनिबंधेषु चाविशेषेण वेदांतशाब्दस्य लोके प्रयोगदर्शनात्सर्वत्र मुख्यवृत्तितः प्रतीतिं वारयन्मुख्यगौणभेदेन वेदांतशब्दं व्युत्पादयति। वेदांतो नामेत्यादिना। उपनिषच्छब्दो ब्रह्मात्मैक्यसाक्षात्कारविषयः उपनिपूर्वस्य क्विप्प्रत्ययांतस्य षड्लृ विसरणगत्यवसादनेष्विति सद्धातो रूपनिषदिति रूपं तत्रोपशब्दः सामीप्यमाचष्टे तच्च संकोचकाभावात्सर्वांतरे प्रत्यगात्मनि पर्यवस्यति निशब्दो निश्चयवचनः सोऽपि तत्त्वमेव निश्चिनोतीति तत्रैके

वेदांतो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च।

द

त्ववाच्युपशब्दसामानाधिकरण्येन। तस्माद्ब्रह्मविद्या स्वसंशीलिनां संसारसारतामतिं सादयति विषादयति शिथिलयतीति वा परमश्रे
त्य योरूपं ब्रह्मात्मानं सादयति गमयतीति वा दुःखजन्मप्रवृत्त्यादिमूलाज्ञानं सादयत्युन्मूलयतीति वोपनिषत्पदवाच्या। सैव प्रमाणं तस्याः प्रमारूपायाः करणीभूतः सर्वशाखास्वन्तभागेषूपद्यमानो ग्रंथराशिरप्युपचारात्प्रमाणमित्युच्यते। तथा चोपनिषदः प्रमाणं प्रमाकरणमुपनिषत्प्रमाणं वेदांत इत्यर्थः। तदुपकारीणीति। वेदांतार्थविचारानुकूलानीति यावत्। तदनुकूलत्वं वेदांतवाक्यप्रमेयासंभावनाद्यपहारान्न तु प्रमित्युत्पत्तौ तत्फले वा साक्षाद्विचारशास्त्रसंगाभावः। तथा सति वेदांतवाक्यानां सापेक्षताप्रसंगात्। तदुक्तमभियुक्तैः। स्वाध्यायवच्चकरणं घटते विचारो नाप्यंगमस्य परमात्मधियः प्रसूतौ। सापेक्षतापततिवेदगिरस्तथात्वे ब्रह्मात्मनः प्रमि रामः

२ ४१

ति जन्मनि तन्न युक्तमिति। शारीरमेव शारीरकं तत्र भवो जीवः शारीरकः स सूच्यते यथा याथातथ्येन निरूप्यते यैस्तानि शारीरकसूत्राणि
अथातो ब्रह्मजिज्ञासेत्यादिकानि। यद्वा शारीरकस्य सूत्राणि तद्याथात्म्यवादीनि वेदांताधीसंग्रहवाक्यानि। आदिशब्दो भाष्यादि

कोभावः। नि
मित्तमात्राह्रे
पइति चेतन
५

संग्रहार्थः। चशब्दो वेदांतशब्दानुषंगार्थः। तथा च वेदानामंतोऽवसानभागो वेदांत इति व्युत्पत्तियोगान्मुख्यो वेदांतशब्दो वेदविभा
गोत्तरमेदेषु शारीरकादौ तूपचरित इति व्युत्पादितः। ननु किं पुनरस्य ग्रंथस्यारंभे निमित्तं न खलु निर्निमित्ता प्रेक्षावत्प्रवृत्तिरिति।
चेत्। अशनायाद्यनेकोर्मिमालाकुलसमुद्भूतक्षोभहतविवेकज्ञानपाथसि हृद्दत्तर कामक्रोधाद्युत्तुंगशैलजालविषमे सुतदुहितृक

ए अस्य वेदांतप्रकरणत्वे तदीयैरेवानुबंधैः तद्वत्तासिद्धेर्न ते पृथगालोचनीयाः।

लत्रबांधवाद्यनेकमकरनक्रचक्राकुले नरमृगपशुपक्षिदेवादिस्थानभोगफेनबुद्बुदे संसारसागरे अनवरतमधऊर्द्धुति।
र्यग्वा मज्जनोन्मज्जनादिविवशानतिविततगंभीरार्थानेकशाखावेदांतविचारमहाद्रुमावलंबनासमर्थान् दुःखिनो
ना४ ल्लोकाँल्लोकयसंजातकरुणत्वाऽनिमित्तत्वोपपत्तेः। अथ निमित्तविप्रेक्षा चेदपेक्ष्यते त्राह। अस्येति। शास्त्रैकदेशसंबद्धं शास्त्रैका
र्यांतरे स्थितमाहुः प्रकरणं नाम ग्रंथभेदं विपश्चित इति हि प्रकरणलक्षणं वदंति। तथा च यच्छास्त्रैकदेशसंबद्धं यत्प्रकरणं।
तत्तच्छास्त्रीयैरेवानुबंधैरनुबंधवद्युक्तं। अन्यथा शास्त्रप्रकरणयोर्भिन्नविषयादिमत्त्वेन शास्त्रासंबद्धत्वप्रसंगात् संबद्धप्र।
त्वपि तन्निदमापद्येत। अतोऽस्य ग्रंथस्य वेदांतशास्त्रीयप्रकरणत्वाद्वेदांतशास्त्रसिद्धैरेवानुबंधैस्तद्वत्तासिद्धेर्न ते नुबंधाः पृथगालो

वे॰सा॰
टी॰ ५

चनीयाइत्यर्थः। ननु महाविषयादेरिह शास्त्रीयत्वेऽप्यवांतरविषयादेः पृथगालोचनमुचितमितरथा शास्त्रं परित्यज्य प्रेक्षावतोऽप्रवृत्त्य योगादिति चेत्। वाढं प्रकरणत्वेनैवावांतरसंगतेः सुलभालोचनत्वात् पृथगिह निर्देशानपेक्षणात्। तथाहि सारग्रहणेच्छुरवांतराधिकारीस गुणनिर्गुणरूपविषयभेदं परित्यज्य निर्गुणसारमात्रमिह विषयः तन्मात्रावधारणमवांतरप्रयोजनं संबंधो विषयानुरूप इति भावः। ननु शास्त्रीयोऽनुबंधः शास्त्रविद्भिरेव विज्ञायते न व्युत्पित्सुभिस्तत्कथमिह तेषां शास्त्रीयविमर्श्याद्यनभिज्ञानां प्रवृत्तिरित्याशंक्य शास्त्रीयमेव वानुबंधं संक्षेपतो व्युत्पादयितुमुपक्रमते। तत्रेति। तत्र वेदांतशास्त्रे स्वार्थप्रतिपत्तारमनाश्रित्य शास्त्रस्य प्रवृत्त्ययोगादादावधि।

तत्रानुबंधो नामाधिकारिविषयसंबंधप्रयोजनानि। अधिकारी तु विधिवदधीतवेदवेदांगत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मांतरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितांतनिर्मलस्वांतः साधनचतुष्टयसंपन्नः

कार्यनुबंधापेक्षा तस्य च विषयबोधनं तरेणाप्रवृत्तेर्विषयस्य तदानंतर्यं विषयस्य च शास्त्रप्रतिपाद्यत्वसिद्धये संबंधस्य विषयानंतर्यं प्रयोजनस्य चरमत्वं प्रसिद्धमित्युद्देशपाठक्रमो विवक्षितः। तथा च शारीरकसूत्रं अथातो ब्रह्मजिज्ञासेति। तत्र यथोद्देशक्रममधिकारिणं निरूपयति। अधिकारीति। धर्मजिज्ञासाधिकारिणोऽस्य वैलक्षण्यसूचनार्थं तु शब्दः प्रमाताधिकारीत्यन्वयः। लौकिकवैदिकव्यवहारेष्वभ्रांतो जीवः प्रमातेह विवक्षितः जीवमात्रस्य पक्षे भ्रमसंभवेन शास्त्रार्थप्रतिपत्त्ययोगात्। तस्य तु शास्त्रसूचितं विशेषमाह। साधनेति। वक्ष्यमाणसाधनचतुष्टयविशिष्ट इत्यर्थः। अयं भावः न तावद्वेदाध्ययनं ब्रह्मजिज्ञासाधिकारहेतुः। तस्य ध राम

मेव ब्रह्मजिज्ञासयोः साधारणत्वात्। तन्मात्रेणेह नियमेन प्रवृत्त्यनुपपत्तेः। नापि धर्मविचारः। प्रागपि धर्मविचारादधीतवेदांतस्य ब्र
ह्मजिज्ञासोपपत्तेः। नापि धर्मानुष्ठानमिह जिज्ञासाहेतुः। विनापि धर्मानुष्ठानं ब्रह्मचर्यादेव विरक्तस्य ब्रह्मजिज्ञासादर्शनात्। श्रुतिश्च
भवति विविदिषोः संन्यासविधायिनी यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेदित्यादिका। ननु जायमानो वै ब्राह्मणस्त्रिभिरृणैर्वान्
जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी ऽन्तेवासीति श्रुतेः। ऋणानि
त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्। अनपाकृत्य मोक्षं तु सेवमानः पतत्यधः इति स्मृतेश्च ऋणत्रयापाकरणमंतरेण मोक्षप्राप्त्य।
विचारप्रवृत्त्ययुक्ततायागम्यमानत्वात् कथं धर्ममननुष्ठाय संन्यासपूर्वकविचारे प्रवृत्तिरिति चेत्। उच्यते श्रुतिस्तावत् हृदय।
स्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस इति पश्चवदानत्रयविधिमुपक्रम्य तदवदानैरेवावदयते तदवदानामवदानत्वमित्यवदा ना
ननिर्वचनेनोपसंहारादवदानत्रयविध्यर्थवादत्वान्न स्वार्थपरा। अतः सा ब्रह्मचर्यादेवेति श्रुत्यान्यपरया बाध्यते यदि ब्रह्म
चर्यादिभिरपाकरणीयं ऋणत्रय [redacted] मप्यवदानैरेवावदयते इत्यवदानश्रुतौ ब्रह्मचर्यादेर्ऋणत्रयापाकर
णहेतुत्ववचनं स्वार्थपरमेवेति मतं तथापि जातमात्रस्य ऋणत्रयसंबंधे प्रमाणाभावादधिकारी जायमानो गृहस्थो वा जायमान इति
वाक्याख्यानमुचितं। स्मृतिस्तु विरक्तविषयतया व्याख्येया। एते न यस्तायुधी यजमानः जरया वास्मान्मुच्येरन्नावीरहा वा एष देवानां यो
ऽग्निमुद्वासयते इत्यादिश्रुतयः। एकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्येत्यादिस्मृतयश्च व्याख्याता वेदितव्याः। ब्रह्मचर्याद
व प्रव्रजेत्। यदहरेव विरजेत्तदहरेव प्रव्रजेत्। अथ पुनरव्रती वा व्रती वा किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे किं प्रजया क तीउ
रिष्यामः येषां नोऽयमात्मेति याज्ञवल्क्यः प्रवव्राज ये प्रजामीषिरे ते श्मशानानि भेजिरे ये प्रजां नेषिरे तेऽमृतत्वं हि भेजिरे इत्यादि
श्रुतिस्मृत्यविरोधात्। तस्मान्न धर्मानुष्ठानं ब्रह्मजिज्ञासाहेतुः। अतो ब्रह्मजिज्ञासा जायमानायस्मिन्नस्त्येव नियमेन जाय

५ ग्रंथलोकः

वे॰ सा॰ तेयस्मिन्सतिनैवजायते तदेवतस्याःसाधनमेषितव्यं। तच्चवक्ष्यमाणसाधनचतुष्टयमेवेति। कस्मात्पुनःसाधनसंपन्नस्तत्राह। नि
टी॰ ५ तांतेति। नितांतमत्यंतंनिर्मलंशुद्धंस्वांतमंतःकरणंयस्यसतथा। कुतःस्वांतस्यनैर्मल्यंप्रतिबंधकरागादिवासनानिवृत्त्येत्याह। निर्ग
5 तेति। रागादिवासनारूपकल्मषनिवृत्तिरपिकुतस्तत्राह। नित्येति। काम्यकर्मभिरतस्यानुष्ठीयमानमपिनित्यादिनस्यात्तत्कल्मष
निवृत्तिहेतुःकामवासनयाशुद्धिप्रतिबंधसंभवात्। तथानिषिद्धावर्जनेपापेनप्रतिबंधादित्यभिप्रेत्यनित्याद्यनुष्ठानेविशिना
ष्टि। काम्येति। एवंनित्याद्यनुष्ठानस्यशुद्धेश्चैकभविकत्वनियमंव्यावर्त्तयति। अस्मिन्निति। अनेकजन्मसंसिद्धस्ततोयातिप
रांगतिं। नहिकल्याणकृत्कश्चिद्दुर्गतिंतातगच्छतीत्यादिस्मृतेर्जन्मांतरानुष्ठितस्यापिजन्मांतरोपकारकत्वसंभवादितिभावः।
एवंकाम्यनिषिद्धवर्जनपुरःसरमिहजन्मनिजन्मांतरेवानुष्ठितनित्यादिक्षपितकल्मषस्यविवेकादिसाधनचतुष्टय
संपत्तौकारणमाह। आपाततइति। आपाततोविचारेणेदंपर्यावधारणमंतरेणाधिगतोखिलोवेदार्थोयेनसतथावेदश
ब्दोवेदांतविषयः। वेदार्थज्ञानेहेतुमाह। विधिवदिति। ब्राह्मणेनषडंगोवेदोनिष्कारणोध्येयोज्ञेयश्चेतिवचनाज्ञ
त्याध्ययनविध्युपादापितवेदांतवचोभिर्निरुक्तव्याकरणाद्यंगोपकरणैरनववुद्धतात्पर्यलिंगैरधिगताखिलवेदांता
र्थोऽस्त्यर्थः। एतदुक्तंभवतिवस्तुतश्चित्सदानंदब्रह्मस्वभावोप्यात्मानाद्यनिर्वाच्याविद्यासंबंधलब्धजीवभावोऽवि
द्याकामकर्मवशंगतःकाम्यनिषिद्धाद्यनवरतमाचरंस्तत्फलभूतस्वर्गनरकौभुंजानस्तज्जन्यवासनावासितस्तदनुरू
पंपुनःकर्मपुनःफलमित्येवंघटीयंत्रवत्कुलालचक्रवच्चोर्ध्वाधस्तिर्यक्भ्रमणमविश्रममनुभवन्दृष्टःहताथोमूा राम ५

ढो दुःखीत्यात्मानं मन्ये वमन्यते । एकः काम्योपरो नित्यस्तथा नैमित्तिकः परः । प्राधान्येन फलं स्वर्गाद्यैहिकी काम्यकर्म । णः । प्राधान्येन मनःशुद्धिर्नित्यस्य फलमार्थिकं । केवलं प्रत्यवायस्य निवृत्तिरितरस्य त्वित्यादिपुराणवचनात् । इतीतानेकजन्म सुकृतजन्यादृष्टविशेषपुण्यपुंजपरिपाकोदयवशात् काम्यफलेषु जातदोषबुद्धिराध्यात्मिकादिदुःखत्रयं च निश्चिद्धा चरणफल माकलयन् काम्यनिषिद्धे परित्यजन्नीश्वरार्पणबुद्ध्यानुष्ठितनित्यादिक्षपितकल्मषतया निर्मलस्वान्तो धीतसांगवेदार्थोपा । तालोचनया लब्धविवेकादिसाधनसंपन्नः स्वात्मयाप्यात्मजिज्ञासुर्वेदान्ताधिकारीति । काम्यादिपदार्थान्कथयति । काम्या नीत्यादिना । फलोद्देशेन विधीयमानानि कर्माणि काम्यानि । न च विश्वजिता यजेतेत्यादावव्याप्तिः तत्रापि स स्वर्गः स्यात्सर्वा ।

काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि । निषिद्धानि नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि । नित्यानि अकरणे प्रत्यवायसाधनानि संध्यावंदनादीनि ॥

दी

न्यत्वविशिष्टत्वादिति न्यायेन स्वर्गफलोद्देशेन विधेः साधितत्वात् । ज्योतिष्टोमशब्द एकाहिकविषयः । आदिशब्दोऽहीनसत्रसं । ग्रहार्थः । [illegible]मावगतेष्टसाधनतानिषेधकनञ्पदयोगिवाक्यगम्यानि निषिद्धानि लिङाद्यनुषक्तनञ्योगिवाक्यगम्यानि वा । नर काद्येत्यादिपदादैहिकदुःखग्रहः । ब्राह्मणहननादीत्यादिपदात्सुरापानादिग्रहः । प्रत्यवायशब्देनागामिदुःखमुच्यते । येषामक रणे विज्ञायमानेन तत्साध्यते ज्ञाप्यते तानि नित्यानीत्यर्थः । अकरणे प्रत्यवाय[illegible]त्तेरुक्तानि नित्यानीति यावत् । नि र्निमित्तमुपात्तदुरितक्षयार्थानि नित्यानीति नित्यकर्मलक्षणं न त्वकरणे प्रत्यवायोत्पादकानि नित्यानीति । [illegible] । नन्वकुर्व न्विहितं कर्म निन्दितं च समाचरन् । प्रसंजंश्चेन्द्रियार्थेषु नरः पतनमृच्छतीति स्मृतो प्राक्प्रत्यवायादकरणस्य प्रत्यवायहेतुत्व ।

वे० सा० टी० ६ नै२

6

सवर्गेतेतत्कथमकरणस्यप्रत्यवायानुत्पादकत्वमितिचेन्नालक्षणहेत्वोः क्रियायाइतिपाणिनिनाप्रातुर्लक्षणार्थेपि विधानात्।
अतएवनित्याद्यनुष्ठानकालेनिद्रालस्यादिपरवशंनरमालोक्यशिष्टैर्लक्ष्यंपद्यस्ययथावन्नित्यनैमित्तिकानुष्ठानमभवि
ष्यत्तदासंचितदुरितक्षयोभविष्यत् नचायंविहितमकार्षीदतः प्रत्यवायीभविष्यतीति तथाचविहिताकिरणान्नरस्त्रीत्रियइतिवा
च्यतप्रत्ययस्यान्यथाप्युपपत्तेर्नेतद्बलादभावस्यहेतुत्वाभ्युपगमोयुक्तः। तदुक्तं नित्यानामक्रियायस्माल्लक्ष्येयितेतिसत्वराप्रत्यवा
यक्रियांततस्माल्लक्षणार्थेप्रतानाभवेत् इति। ननुहेत्वर्थेपिशतुर्विधानस्यतुल्यत्वेकथंलक्षणार्थावगमइतिचेन्न। अभावाज्ञा
वोत्पत्तेरनुपपत्तेरितिवदामः। भावरूपस्यहिकार्यस्यभावरूपंकारणमितिप्रत्यक्षादिभिरवधारिततेनशास्त्रप्रत्ययादभावस्य
भावहेतुताभ्युपगमोविरुध्यते। नन्वेवंसतिकथंतवाप्यकरणस्यप्रत्यवाय [redacted] लक्षकत्वसिद्धिरितिचेत्
। नैवदोषः नास्माभिरकरणस्यस्वरूपेणप्रत्यवायलक्षकत्वमिष्यते किन्तुतज्ज्ञानस्य। नचतस्यैवप्रत्यवायजनकत्वमपीतिवाच्यं। नि
त्याकरणज्ञानेप्रत्यवायाभावप्रसंगात्। ननुकथंतर्हिभावेऽभावैरनुपलंभस्याभावप्रमितिहेतुत्वमिष्यते। किंकेप्रतिबंधकाभावा
स्यतत्रप्रागभावस्यचकारणत्वमिष्यतेइतिचेत्। भ्रांत्येतिब्रूमः तथाहि नतावद्योग्यानुपलब्धेः स्वरूपसत्तामात्रेणाभावप्रमि
तिहेतुतायुक्ता। तथासत्यज्ञातकरणकत्वेनाभावज्ञानस्यप्रज्ञातभावप्रसंगात्। ज्ञातायाएवानुपलब्धेरभावप्रमाहेतुत्वेता
ज्ञानस्यैवभावरूपस्याभावज्ञानकारणतावलादायास्यतीति। प्रतिबंधकाभावः कारणमितिपक्षेसकिंदृष्टकारणकला
पकुद्धोनिर्दिष्टः किंवादृष्टकारणकलापकुद्धो। आद्येदाहादिकार्यार्थिनः काष्ठादिसमवधानाधिगमएवप्रति
बंधकाभावसमधिगमेसत्येववह्निप्रज्वलनादौप्रवृत्तिःस्यात्। नचतथाप्रवर्तमानोदृश्यते। अन्यथासत्यपिप्रा
तिबंधकसमवधानेतदभावनिश्चयेनप्रवर्तमानस्यकदाचित्कार्यानुदयोनभवेत्। ननुसतिप्रतियोगिनितदा ६

भावनिरूप्यो भ्रम इति चेत्। तर्हि प्रतिबंधकस्यायोग्यत्वे न तदभावोप्यग्रहणेवेति न तस्य दृष्टकारणकलापकुक्षिनिक्षे
पः। नापि द्वितीयः अस्मदाद्यप्रत्यक्षाणामीश्वरतज्ज्ञानेच्छाप्रयत्नप्रारब्धदृष्टानां देशकालयोश्च स्वीयादिग्रहचारक्रिया।
याश्च भावरूपतया प्रतिबंधकाभावत्वायोगात्। तदतिरिक्तस्य कस्यचित्सर्वकार्यसाधारणकारणस्य कल्पकाभावात्।
किं च सत्यपि प्रतिबंधके उत्तेजकसमवधाने कार्यदर्शनान्न प्रतिबंधकाभावस्य कारणता। उत्तेजकाभावविशिष्टप्रतिबंध
काभावस्य कारणत्वे तादृक्प्रतिबंधकाज्ञाने तदभावाग्रहात्तस्य कारणतासिद्धिः। न चानन्यथासिद्धनियतपूर्ववर्तित्वमपि प्रति यो ५
बंधकाभावस्य तदन्वयव्यतिरेकयोर्विरोधिसंसर्गाभावविषयतयान्यथासिद्धत्वात्। तर्हि विरोधिसंसर्गाभावत्वेनैव कारण
तेति चेन्न। सत्येवोत्पत्तिहेतुकलापसमवधाने स्थितिहेतुसमवधाने चोत्पत्तेः स्थितेर्वा विघटकभावस्य विरोधित्वप्रसिद्धेर्न तद
भावस्य सामग्र्यंतर्भावो विरोधिसंसर्गाभावस्य तत्प्रवेशे तत्प्रतियोगिनो विरोधित्वसिद्धिस्तस्मिंश्च सति तत्संसर्गाभावस्य साम
ग्रीप्रवेश इत्यन्योन्याश्रयस्य दुरुद्धारत्वादित्यलमतिकदूमेन। प्रागभावस्यापि नियतप्राक्कालवर्तित्वेन कारणत्वेऽभावविशे
षणस्य कालस्यात्माश्रयताप्रसंगः। न च प्रागभावत्वेनैव कारणत्वं। तावन्मात्रेण लक्षणाभावात्। किं च कारणत्वं ना
मधर्मो भावात्मक उताभावात्मक उभयथापि नाभावनिष्ठत्वं तस्य संभवति। विरोधिनोर्भावयोराधाराधेयभावानुपप भैषा ४
त्तेः। अभावस्य निर्विशेषत्वान्निरतिशयत्वाद्वा। तस्मान्नाभावाद्भावोत्पत्तौ दृष्टांतः। तंतुनाशात्पटनाश इत्यपि स्वप्रक्रिया
मात्रमित्यास्तां विस्तरः। अस्तु वा क्वचिदभावस्यापि कारणत्वं तथापि न प्रत्यवायस्याकरणं हेतुकत्वं। प्रत्यवाय
शब्दवाच्यस्य पापादृष्टस्य तज्जन्याग्रामिदुःखस्य वा निषिद्धक्रियाजन्यत्वात्। पापकारी पापो भवति। श्रीरामाय०

वे.सा.
टी. १

अप्रत्यवायः इष्टकपूर्वं चरणं अग्निहोत्राभ्यासो ह्यते कपूर्वाया योनिमापद्येरन् इति च श्रुतेः। तस्मादकरणे प्रत्यवायसाधनानि प्रत्यवायज्ञाप
कानि नित्यानीति व्याख्यानं सुव्याख्यानमिति। संध्यावंदनादीनीत्यादिपदात् च महायज्ञादिग्रहः। निमित्तमात्रमासा
द्यावश्यकर्तव्यतया विहितानि नैमित्तिकानि एतदाह। पुत्रेति। जातेष्टिर्नाम वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जात इति
विहिता। आदिपदात् गृहदाहे अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदित्यादिनोक्तानां क्षामवत्या
दीनां ग्रहोपरागस्नानादीनां च स्मार्तानामुदाहरणीयानां। यद्यपि जातेष्टिर्वा कथं भवेत् यस्मिन् जात एतामिष्टिं निर्वपति स पूत एव तेज
स्व्यन्नाद इन्द्रियावी पशुमान् भवतीति पुत्रगामि अवांतरफलश्रवणं वक्ष्यमाणकर्तृगामि द्विविधफलानुकूलं जातेष्टयुदा
नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि जातेष्ट्यादीनि। प्रायश्चित्तानि पापक्षयसाधनानि चांद्रा
यणादीनि। उपासनानि सगुणब्रह्मविषयकानि मानसव्यापाररूपाणि शांडिल्यविद्यादीनि
हरणं तथापि नैमित्तिकस्वरूपमात्रव्युत्पादनायोदाहरणं न दुष्यतीति द्रष्टव्यं। विहिताकरणप्रतिषिद्धसेवारूपनिमित्तविशेषानु
बंधीनि प्रायश्चित्तानि पापक्षयमात्रोद्देशेन विहितानीति वा। आदिपदात्कृच्छ्रादिग्रहः। शास्त्रबोधिते सगुणे ब्रह्मणि अदीर्घका
लादरनैरंतर्योपेतमनोवृत्तिस्थिरीकरणलक्षणान्युपासनानि। उपासनानां ज्ञानाद्भेदं दर्शयति। मानसव्यापारेति।
निदिध्यासनाद्भेदमाह। सगुणेति। शांडिल्यविद्या नाम सर्वं खल्विदं ब्रह्मेत्युपक्रम्य स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भा
रूप इत्यादिना छांदोग्ये विहिता। वाजिनामग्निरहस्येऽपि कांडे स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपमित्यादावुक्ता
। वृहदारण्यके च मनोमयोयं पुरुषो भाः सत्य इत्यादौ प्रत्यभिज्ञाता विद्या। आदिशब्दाद्दहरवैश्वानरादिविद्यांतरग्रहः। इदा
राम १

नामीश्वरार्पणेन तयानुष्ठीयमानानां परमफलं दर्शयति। एतेषामिति। आदिपदान्नैमित्तिकप्रायश्चित्तयोर्ग्रहः। नित्यादीनामुपात्तदुरितक्षयद्वारा बुद्धिशुद्धिहेतुत्वमिति द्रष्टव्यं निर्गतनिखिलकल्मषतयेत्युक्तत्वात्। नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमित्यादिस्मृतेः। धर्मेण पापमनुदतीति श्रुतेश्च। चित्तशुद्धेः परमप्रयोजनत्वं परंपरया मोक्षसाधनत्वात्। तथा च स्मृतिः स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः। स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु। एवं तूपक्रम्यासक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः। नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छतीति। तदुक्तं। नैष्कर्म्यसिद्धावपि नित्यकर्मानुष्ठानात् धर्मोत्पत्तिर्धर्मोत्पत्तेः पापहानिस्ततश्चित्तशुद्धिस्ततः संसारात्मयाथात्म्यावबोधस्ततो वैराग्यं ततो मुमुक्षुत्वं

एतेषां नित्यादीनां बुद्धिशुद्धिः परमं प्रयोजनं। उपासनानां तु चित्तैकाग्र्यं तमेतं वेदा-
नुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेनेत्यादिश्रुतेः। ॥ ॥ ॥

ततस्तदुपायपर्येषणं ततः सर्वकर्मसंन्यासस्ततो योगाभ्यासस्ततश्चित्तस्य प्रत्यक्प्रवणता ततस्तत्त्वमस्यादिवाक्यार्थपरिज्ञानं ततो विद्योच्छेदस्ततः स्वात्मन्यवस्थानमिति। उपासनानां त्विति। तुशब्दः कर्मभ्य उपासनाया वैशिष्ट्यद्योतनार्थः। तस्य नित्याद्यनुष्ठानक्षपितकल्मषतया विशुद्धस्य चित्तस्य शास्त्रप्रकाशितध्येये ज्ञेये वा विषये ऐकाग्र्यं निश्चलत्वमित्यर्थः। सूक्ष्मार्थावधारणसमर्थत्वमिति यावत्। पूर्वोक्तप्रकारेणानुष्ठीयमानानां नित्यादीनामुपात्तदुरितक्षयद्वारा शुद्ध्यादिपरंपरया ज्ञानहेतुत्वे प्रमाणमाह। विविदिषंतीति। आदिपदात्तपसानाशकेनेति वाक्यशेषग्रहः। विविदिषंतीति विविदिषासंबंधो विधिप्रत्ययानुसंधेयोऽपूर्वत्वात्। न हि यज्ञादीनां विविदिषासंयोगः पूर्वं प्राप्तो येनानुवादकत्वं वाक्यस्य कल्प्येत। ननु यज्ञादीनां यावज्जीववाक्ये

त्वेयोगपृथक्त्वन्यायेनेति। एकस्य तूभयत्वे संयोगपृथक्त्वमिति जैमिनिसूत्रं एकस्योभयार्थत्वे संयोगस्य विनियोजकप्रमा
णस्य पृथक्त्वमुभयत्वे नियामकमिति शेषः। तथा च पृथक्स्य स्वादिरत्वस्य क्रत्वर्थत्वं पुरुषार्थत्वं च खादिरो यूपो भवति।
खादिरं वीर्यकामस्य यूपं कुर्वीतेति वाक्याभ्यां तथा बोधितत्वात् तथा मुक्तेः फलान्तरस्य चबो...धकवाक्याभावे मुभयार्थ
दि
त्वेऽप्यर्थः।

वे.सा. गः प्रसङ्गेन यदि च विविदिषार्थं यज्ञाद्यनुष्ठानमपरमिष्यते ततः संसारस्याविच्छिन्नोऽद्धिरनुष्ठानं स्यादिति चेत् स्वादिरादि
टी०८ वत् संयोगपृथक्त्वोपपत्तेः। न तु र्दितेनैव न्यायेन कर्मणां मोक्षार्थत्वमपीति शङ्कनीयं। ज्ञानकर्मसमुच्चयनिराकरणात्
। तथा च न्यायोऽस्त एवाग्नीधनाद्यनपेक्षेति। कर्मणां ज्ञानं प्रत्यारादुपकारकत्वं तु स्यात्। सर्वापेक्षा च यज्ञादिश्रुतेरश्वा
४ वदिति न्यायात्। उक्तं च भाष्यकृद्भिः विविदिषा संयोगानुवाह्यतरा णि यज्ञादीनीति। तत्रैव स्मृतिं संवादयति। तपसेति। आ
दिपदात्कषायपक्तिः कर्माणीत्यादिस्मृत्यंतरग्रहः। ननु नित्यादेः सत्त्वशुद्धितदेकागम्यफलकत्वे कर्मणा पितृलोको विद्य
यादेवलोकः। सर्व एते पुण्यलोका भवंतीति श्रुतिर्नित्यादीनां पितृलोकादिफलपरापीड्येतेत्यत आह। नित्येति। अत्र प्राय श्चि

तपसा कल्मषं हंति विद्ययामृतमश्नुत इत्यादि स्मृतेश्च। नित्यनैमित्तिकयोरुपासनानां चावां
सत्यलोक? तरफलं पितृलोकप्राप्तिः। कर्मणा पितृलोको विद्यया देवलोक इत्यादि श्रुतेश्च॥ ॥ विद

पृ६ त्तानां दुरितक्षयस्तस्याऽवांतरफलाभावात्। न ह्युपात्तदुरितक्षयं मत्वेतरेणात्तस्य किंचित्फलं श्रुतमस्ति। अत्र नयोस्तु नच्छूयत इति शे
षः। नित्यनैमित्तिकयोः पितृलोकप्राप्तिरवांतरफलं। उपासनानां सत्यलोकप्राप्तिरिति विवेकः। तद्य थाम्रे फलार्थे नि
त्य५ र्मिते छाया गंध इत्यनूद्यते इति स्मृत्युक्तछायागंधवत्पितृलोकादिफलस्यावांतरत्वमानुषंगिकत्वं तदुद्देशेन नित्या
देरविधानात् विविदिषासंयोगस्य च विधानाच्छुद्धेरेव महाफलत्वमिति भावः। ननु पितृलोकस्य कथं नित्यादिसाध्यत्वा
ग्न्याद्यादिकर्मसाध्यत्वात् तस्य देवलोकस्य चाष्टाशीतिसहस्राणां मुनीनामद्धिरेतसामुत्तरेणार्यमणः पथा इत्यादिस्मृतेः।
नैष्ठिकाद्यूर्ध्वरेतसामाश्रमधर्ममात्रसाध्यत्वावगमात् कुतो विद्याफलत्वमिति चेत्। अत्र पश्यामः। किं श्राद्धादि नित्यैने राम
८

यं न निस्तादेः पितृलोकः फलं। द्वितीये तस्य विध्युद्देश्यफलेनैव निराकांक्षत्वात् पितृलोकफलसंबंधाभावात्। नापि विनावि
म २ द्यामूर्ध्वरेतसामाश्रमधर्ममात्रेणोत्तरमार्गगमनं संभवति। विद्यया तदारोहंति यत्र कामाः परागताः न तत्र दक्षिणा यांति
नाविद्वांसस्तपस्विन इति श्रुतौ विद्याविरहिणमुत्तरमार्गनिषेधात्। निर्णीतं चैतदाचार्यैर्गुणोपसंहारपादे अनियमः
सर्वेषामविरोधः शब्दानुमानाभ्यामित्यत्राधिकरणे अस्तु तर्हि नापुनरावृत्तिर्मूर्ध्वरेतसामाचष्टे किंतु गमनमात्रं। अतो नु देवलो
कप्राप्तिः तत्र ब्रह्मलोकगतानां नापुनरावृत्त्यभावो वा गम्यते एते न प्रतिपद्यमाना इमं मानवमावर्तं नावर्तंत इति तेषामिह न पु
नरावृत्तिरिति चायत् पुनरत्र इमम् इहेति च विशेषणात् कल्पांतरे आवृत्तिरवगम्यते तद्विद्याविरहितानां। अनावृत्तिस्तु विद्या
रो १ वतां क्रममुक्त्याम्नानादिति रहस्यं। नन्वेवं सति छांदोग्यभाष्यविधस्तत्र हि महता संरंभेण ये चेमेऽरण्ये श्रद्धा तप इत्यु
पासते इति पंचाग्निविद्यागतवाक्यव्याख्यानावसरे गृहस्थानां विद्यारहितानामन्नतपैस्तुनमायादेभाव ब्रह्मचर्या
ता दिभिरपूतत्वात् अन्यस्य धर्मनिष्ठामात्रेणोत्तरमार्गगतिरस्ति। इतरेषां नैष्ठिकवानप्रस्थमुख्यसंन्यासिनां तु तद्वि
परीतत्वात् पूततया स्वाश्रमधर्मनिष्ठामात्रेणोत्तरमार्गगतिरपुनरावृत्तिलक्षणा भवेदित्याचार्यैरेव निरूपितं॥
न तत्र दक्षिणेत्यादिश्रुतिः परममुक्त्यपेक्षेति च व्याख्यानं तत्कुत एवं विभागवचनमिति चेत्सत्यं। ऊर्ध्वरेतसामुत्तरा
मार्गेण ब्रह्मलोकगमनं विद्यां विनापीत्येतावन्मात्रं तत्रोक्तं न पुनरावृत्तिः कापुनरावृत्तिस्तत्र विवक्षिता। आभूतसंप्ल
वं स्थानममृतत्वं हि भाष्यत इत्यपेक्षितकाम्यतत्त्ववचनोदाहरणात्। गुणोपसंहारे च तस्मादिदमश्रद्धातपोभ्यां विद्यांतरो
पलक्षणं वाजिसनेयिनस्तु पंचाग्निविद्याधिकारे धीयते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासत इत्युदाहृत्य तत्र श्र
द्धालवो ये सत्यं ब्रह्मोपासत इति व्याख्येयं। सत्यप्राब्रह्मण्य सहकृत्प्रयुक्तत्वादिति तैरेव व्याख्यातत्वात्। याज्ञवल्क्य

तावंतएवमुनयः सर्वारंभविवर्जिताः तपसा ब्रह्मचर्येण संगत्यागेन मेधया तत्र गत्वावतिष्ठंते यावदाभूतसंप्लवमिति। तस्मादात्यं-
तिक्यपुनरावृत्तिर्विद्यावतामेवेति युक्तं। क्रममुक्तिहेतुत्वाद्विद्यायाः। नच तर्हि मुक्तेरेव विद्यायाः परमप्रयोजनत्वाच्चित्तै-
काग्र्यस्य तदयुक्तमिति वाच्यं। सगुणब्रह्मविदस्तथात्वेपि निर्गुणब्रह्मविद्याधिकारित्वाच्चित्तैकाग्र्यताया एव परमप्रयोज-
१ ८४ नत्वात्। तस्यापि साक्षात्कारो यावत्प्रागेव प्रमीतस्य ब्रह्मलोकगमनोपपत्तेः। प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः इ-
त्यादिस्मृतेश्च सगुणब्रह्मविदोपि ब्रह्मलोकं गतस्य तत्र भोगं विद्यावांतरफलं भुक्त्वा तत्रत्योत्पन्नचित्तैकाग्र्यद्वारा स्वयंभा-
वितवेदांतवाक्यार्थज्ञानादेव मुक्तिरिति नियमात्। भवत्वेवं चित्तैकाग्र्यतोपासनायाः परमप्रयोजनमिति न किंचिद्दुष्यति
। तस्मात्सर्वएते पुण्यलोका भवंतीति श्रुते नित्यनैमित्तकयोः फलवत्त्वस्य वाचनिकत्वात्तथात्वेप्युक्तफलद्वारेण भेदेन काम्य

साधनानि नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमादिषट्कसंपन्मुमुक्षुत्वानि।

वैषम्यात्फलविशेषस्य चाश्रुतत्वात्पितृलोकस्य च फलात्मनः कर्मविशेषाकांक्षितत्वान्नष्टाश्वदग्धरथन्यायेन कर्म-
णा पितृलोक इति श्रुतिरुपपद्यते काम्यप्रायश्चित्तयोः फलविशेषोद्देशेन पापक्षयमात्रार्थत्वेन च विधानात्फलां-
तराकांक्षाभावात्। तथांगावबद्धानामुपासनानां कर्मसमुच्चयार्थत्वादनंगावबद्धानामपि प्रतीकोपासनानामब्रह्मोपा-
सनानां चाभ्युदयफलत्वात्कार्यकारणब्रह्मोपासनानामवांतरफलं देवलोकशब्दवाच्यं ब्रह्मलोक इति परिशेषात्सि-
द्धेर्युक्तं विद्यया देवलोक इति वचनमित्यलं प्रपंचेन। साधनसंपन्नः प्रमाताधिकारीत्युक्तं तत्र कानि साधनानि किय-
तीत्यपेक्षायां तानि विभजते। साधनानीति। विवेकमंतरेण वैराग्यायोगाद्विवेकस्य प्राथम्यं। नहीदं हेयमिदमुपादेयमि- रा.म. २
ति विवेकमंतरेण

हेयाद्रागनिवृत्तिः संभवति अनिवृत्तरागस्य शमाद्यभावात् शमाद्यपेक्षया विरागस्य पूर्वमुद्देशः शांतादिहीनस्य मुमुक्षायोगात्ततः प्रागेव शमाद्युद्देशः एतैस्त्रिभिः साधनैः संपन्नस्य मुमुक्षाया अवश्यंभावात्तस्यां च सत्यां ब्रह्मजिज्ञासाया नियमेन प्रवृत्तेः मुमुक्षां तान्येव साधनानीत्यभिप्रायः। विवेकादीन्युद्देशक्रमेण लक्षयति। नित्यानित्येत्यादिना। नित्यत्वं नाम कालानवच्छिन्नत्वं वा अनित्यत्वं नाम तद्विपरीतत्वं वा न स्यात्स्यतीति लोकागमयोर्व्यवहारात् योग्यं नित्यं तद्विपरीतमनित्यमिति वा। तथा च नित्यानित्ये च ते वस्तुनी च नित्यानित्यवस्तुनी तयोर्विवेक इति विग्रहः। केचित्तु नित्यानित्ययोर्वसितु प्रौलंययोस्ते नित्यानित्यवस्तुनी नित्यत्वमनित्यत्वं च तयोः साश्रययोर्विवेको नित्यानित्यवस्तुविवेक इत्याहुः। स चापाततोऽधिगतवेदार्थस्यानुमानकुशलस्य ब्रह्मैव नि

नित्यानित्यवस्तुविवेकस्तावद्ब्रह्मैव नित्यं वस्तु ततोऽन्यद।
खिलमनित्यमिति विवेचनं नित्यानित्यवस्तुविवेकः

त्यं वस्तु ततोऽन्यदखिलमचेतनमनित्यमिति विवेको भवति। तथा हि यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तते। तद्देवा ज्योतिषां ज्योतिः। नित्यं विभुं सर्वगतं सुसूक्ष्मं। आकाशवत्सर्वगतश्च नित्यः। अजो नित्यः शाश्वतः। सत्यं ज्ञानमनंतं ब्रह्म। सच्चिदानंदं ब्रह्म रातेर्दातुः परायणं। यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा यो वै भूमा तदमृतमित्यादि श्रुतिभ्यो ब्रह्मणि नित्यत्वं विशुद्धसत्त्वस्य पुंसः प्रतिभाति तथा नैवेह किंचिनाग्र आसीन्मृत्युनैवेदमावृतमासीत् आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्। सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं। नेति नेतीति नेह नानास्ति किंचन। यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं अथ यदल्पं तन्मर्त्यमित्यादि श्रुतिवचनेभ्यो ब्रह्मणोऽन्यत्र भेदप्रपंचेऽनित्यत्व

चैतन्यस्यैव पुंसः प्रतिभाति। तथानुमानमपि विमतो चेतनवर्गो ऽनित्यो विभक्तत्वाद्घटपटस्तंभादिवदिति अनेन हि विभक्तस्या
नित्यत्वेवगते तस्मिन्ननुगतप्रकाशात्मकस्य ब्रह्मणो ऽविभक्तस्य नित्यत्वमप्यर्थादवगच्छति। आकाशादेश्चोत्पत्ति
मत्त्वसाधनेनानित्यत्वमुत्तरत्र वर्णयिष्यामः। न चैवं श्रुत्यनुमानाभ्यां विवेके सति ब्रह्मणो ज्ञातत्वादलं विचारेणेति वाच्यं
। आपाततो नित्यं वस्तु ब्रह्मेत्यवगमेपि तस्याद्वितीयत्वप्रत्यगभिन्नत्वादेरनिर्द्धारणात् जिज्ञास्याया अनिवृत्तेरिति। त्यागो वि
स्तारः। ऐहिकानामिति। इह लोके भवा ऐहिकाः प्रतिपन्नशरीरसंबंधिनः स्रक्चंदनवनितागृहक्षेत्रपशुपुत्रादिविषयजन्या
सुखरूपा भोगाः कृषिसेवाप्रतिग्रहादिकर्मजन्या अनित्याः पश्चाद्दृष्टा एवमामुष्मिका अप्यमृतादिविषयसेवाजन्या नेदाया

ऐहिकानां स्रक्चंदनादिविषयभोगानां कर्मजन्यतयाऽनित्यत्ववदामुष्मिकाणाम ॥ ॥
अप्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोगविरागः।

गादिकर्मजन्यत्वादनित्या भवितुमर्हतीति निश्चित्य तेभ्यो नितरां छर्दितान्नवज्जुगुप्से इहामुत्रार्थफलभोगविरागस्तदर्थः। अयं भावः
सुखं मे निरतिशयं भूयाद्दुःखं मे मा भूदणुमात्रमपीत्यखिलप्राणिनामस्त्यभिनिवेशस्तौ चैव ममभिनिविष्टाः पुरुषाकारावलंबनेन र
सर्वोत्साहं यतंतोपि न लभंते सुखमात्यंतिकं दुःखाभावं वा। कथं केचित्समुद्रयानराजप्रीणनाद्यतिकष्टमनुभूय फलकाले स्वयं ना
शं यांति केचित्प्राप्तफला अपि व्याध्याद्युपद्रुताः संतो भोगं न लभंते। केचित्तु प्राप्तेषु द्रोगाद्यपि भोग्यभार्यापुत्रादि विना प्राह्णातद्विसेवा राम
दाहाऽन्यैर्वा सह स्पर्द्धासूयादिभिः संचितभोग्यजातस्य क्षयभयेनानावृष्ट्यादिचिंतासंतापादिभिश्च क्षणमपि सुखमलभमा १०
नाः कष्टाद्दरिद्राः कालकुब्जलीव वधिरादयो वा भुक्ता विपासार्दिता बहुलमुपलभ्यंते॥ ॥ श्री गणेशाय नमः। राम राम।

एवं दुःखबहुले संसारे सुखलवमात्रमनुभवन्नपि क्षपणावद्विशुद्धचित्तो न सज्जते किं तु विरज्यत एवेति। नन्वस्त्येवैहिकं
सुखमनित्यत्वादिदोषदुष्टत्वाद्विरागास्पदं तथापि न पारलौकिकादपि विरक्तिरुपपद्यते तद्यपि स्तुत्वानुमानस्याक्षय्यं ह।
वै चातुर्मास्ययाजिनः सुकृतं भवतीति श्रुतिबाधितविषयस्यानुत्थानादिति चेन्नैवं तद्यथेह कर्मचितो लोकः क्षीयत एव
मेवामुत्र पुण्यचितो लोकः क्षीयत इति श्रुत्या वस्तुबलावलंबनेन प्रवृत्तयानन्यपरया सापेक्षादायुफलविषयकायाः प्राशस्त्यलक्ष
णपराया विध्येकवाक्यत्वेनान्यपरायास्तस्या एव बाधितत्वात्। न हि जन्यं नित्यं भावरूपं दृष्टं अत एवैहिकभोगवदेवामुष्मिकेष्वाब्रह्मपर्यंतेषु
भोगेषु वैराग्यमुपपद्यत इति। तदुक्तं भगवता व्यासेन यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं। तृष्णाक्षयसुखस्यैते नार्ह

शमादयस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः। शमस्तावच्छ्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः। दमो
बाह्येंद्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनं। निवर्तितानां च सर्वेषां तद्व्यतिरिक्तविषयेभ्यः उपरमणमुपरतिः। अथवा वि
हितानां कर्मणां विधिना परित्यागः।

तः षोडशीं कलामिति। शमादीन्विभजते। शमादय इति। मनसो बहिः प्रवृत्तौ बाह्येंद्रियाणां द्वारत्वात्तन्निरोधमंतरेण मनसो निग्र
हाशक्तेर्दमानंतरं शमो द्रष्टव्यः। पाठक्रमादर्थक्रमस्य बलीयस्त्वादग्निहोत्रयवागूपाकवत्। मनसोंतःकरणस्य निगृहीतविष
येभ्यो बलादाकर्षणं शम इत्येतावत्युक्ते श्रवणादिविषयेभ्योपि निग्रहे प्राप्ते ततो निग्रहस्य ज्ञानानुकूलत्वाभावादानर्थक्यमि
त्याशंक्य निग्रहं विशिनष्टि। श्रवणादीति। मनननादिसंग्रहार्थमादिपदं एवमुत्तरत्रापि द्रष्टव्यं। तद्व्यतिरिक्तेत्यत्र श्रवणादि[illegible]
र्थः। निवर्तितानां तेषां बाह्यांतरिंद्रियाणां तद्व्यतिरिक्तविषयेभ्यः श्रवणादिव्यतिरिक्तविषयेभ्य उपरमणं पुनर्विषयप्रवृत्त्यनु
त्साहकरणेन स्थिरीकरणमुपरतिरित्यर्थः। ननु शमदमयोर्लक्षणाभ्यामिदमुपरतिलक्षणं संकीर्णं प्रतिभाति बहिःप्रवृत्तें
द्रियव्यापारनिरोधात्मकस्य लक्षणार्थस्य तुल्यत्वादित्यपरितोषात्प्रकारांतरेणोपरतिं लक्षयति। अथवेति। (श्रीरामाय)

वे॰सा॰ टी॰ ११ विहितानामावश्यकर्त्तव्यतया चोदितानां संध्यावन्दनाग्निहोत्रादीनां कर्मणां विधिना तद्धैके प्राजापत्यामेवेष्टिं कुर्वन्ति। प्रा
जापत्यां निरूप्येष्टिं सार्ववेदसदक्षिणां। आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहादित्यादिश्रुतिस्मृत्युक्तमार्गेण परित्या
गः परिव्रजनं संन्यासस्तु परीतिरित्यर्थः। प्रमादिवत्संन्यासोप्यात्मज्ञानान्तरंगत्वादेवं सर्वमुमुक्षुणानुष्ठेयः। तथा च श्रुतयो न
कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। वेदान्तविज्ञानसुनिश्चितार्थाः। संन्यासयोगाद्यतयः शुद्धसत्त्वाः। एतमे
पा ५ व लोकमीप्सन्तः प्रव्राजिनः प्रव्रजन्ति। पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति। तानि वा एता पा ५
न्यवराणि तपांसि न्यास एवात्यरेचयदित्याद्याः। स्मृतयश्च नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति। त्वंपदार्थविचारा
यसंन्यासः सर्वकर्मणां। अर्थस्य मूलं निकृतिः क्षमा च कामस्य मूलं च वपुर्वयश्च धर्मस्य यागादि दयादमश्च मोक्षस्य सर्वोप

शीतोष्णादिद्वन्द्वसहिष्णुत्वं तितिक्षा। निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानं।

रमः। क्रियाभ्यः प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणं। तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमानित्यादयः। नैयश्च पुरुषार्थ
स्योद्देश्यसिद्धये यदुपयुक्तमविरोधि च तदुपादेयं विपरीतं तु हेयमिति। तदिह ब्रह्मात्मजिज्ञासूनां वेदान्तविचारे क्रियमाणे न कर्म
णामुपयोगो विनापि कर्म तदनुष्ठानसिद्धेः। नाप्यविरोधः कर्मविधिप्रविष्टस्य वेदान्तार्थनिर्णयाप्रवृत्तेः। कर्मणां विचारविरोधित्वा
त्। न ह्यपेतब्रह्मत्वदर्शनाद्यकर्तृभोक्तृब्रह्मास्मीत्यात्मनि विचार्यमाणे ब्राह्मणाद्यध्यासविशिष्टात्मप्रतिपत्त्यधीनेषु कर्मस्वऽ
धिकारो न विरुध्यते येनात्मजिज्ञासुनाकर्माणि न त्यक्तव्यानि स्युः। तस्माच्छ्रुतिस्मृतिन्यायैरात्मज्ञानांगतया यः संन्यासः
कर्त्तव्यः प्राप्तः सोपरतिरिति भावः॥ शीतोष्णादीत्यादिपदान्मानापमानलाभालाभशोकहर्षादिग्रहः। श्रवणादावित्यादिश राम ११

ह्यो मननादिसंग्रहार्थः। तदनुगुणेत्यत्र गुरुशुश्रूषापुस्तकसंपादनतद्रक्षणादिः श्रवणाद्यनुगुणो विषयो निर्दिश्यते न पुनः।
सुखवासद्व्याख्यानादिसंग्रहादेरपि श्रवणाद्यनुकूलत्वात्तदर्थमठारंभप्रतिग्रहादावपि चित्तसमाधिः कर्तव्य इत्युपदिश्यते।
दंडमाच्छादनं कौपीनं परिग्रहेच्छेषं विसृजेदिति संन्यासकाले त्याजितस्य दंडकौपीनाद्यतिरिक्तस्य विनाप्रतिप्रसवं शास्त्रसंग्र
हानुपपत्तेरित्यर्थः। समाधिरैकाग्र्यं तत्परत्वमिति यावत्। गुरुवेदांतादीत्यादिपदात्स्मृतीतिहासपुराणानां ग्रहः। विश्वास इ
दमित्थमेव नान्यथेति गुर्वादिवाक्येषु नियता बुद्धिः सा श्रद्धेत्यर्थः। चरममनुबंधं लक्षयति। मुमुक्षुत्वमिति। मोक्षो नामाविद्या
निरस्ताविद्यातत्कार्यब्रह्मात्मनावस्थानं तद्विषयेच्छा मोक्षेच्छा तद्वत्त्वं मुमुक्षुत्वमित्यर्थः। ननु यदा सर्वे प्रमुच्यंते कामा ये स्य हृ
दि श्रिताः। अथ मर्त्योऽमृतो भवतीति श्रुतेः सर्वकामविमुक्तस्य मोक्षाधिकारात्कथमिच्छाधिकारिविशेषणमिति चेत्। न।

गुरुवेदांतादिवाक्येषु विश्वासः श्रद्धा। मुमुक्षुत्वं च मोक्षेच्छावत्त्वम् एवंभूतः प्रमाताधिकारी। शांतो दांत इत्यादिस्मृतेः।

यं दोषः अनात्मविषयेच्छाया एव कामत्वात्तदभिप्राया श्रुतिर्मोक्षेच्छायाः स्वात्मविषयतयाऽकामत्वात्। अथाकामयमानो यो
कामो निष्काम आत्मकाम आप्तकाम इति श्रुतेरात्मकामस्याप्तकामत्वेनाकामत्वावगमादिति। विद्याधिकारिणः शमादि
ब साधनत्वे श्रुतिं प्रमाणयति। शांत इति। शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति काण्वाः पठंति। स
माहित इत्यस्य स्थाने श्रद्धावित्तो भूत्वेति माध्यंदिनास्तदुभयपाठानुरोधेन गुणोपसंहारन्यायमाश्रित्येह शमादयः षड्भिर्दिष्टा
इति द्रष्टव्यम्। शमादेर्विद्याहेतुत्वं भगवानप्याह। योगारूढस्य तस्यैव शमः कारणमुच्यते। अशांतस्य कुतः सुखं तथा। यदा
संहरते चायं कूर्मोऽंगानीव सर्वशः। इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठितेति। सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति। मा
त्रास्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः।

वे॰सा॰
टी॰१२

स्त्रागमाचार्योपदिष्टेनो नित्यानित्यास्तित्वस्वभारतेति। समाधानं चलाबुद्धिः। मय्येवमनन्यआधत्स्व मयि बुद्धिं निवेशयेति। श्रद्धावाँल्लभते ज्ञा
नं तत्परः संयतेंद्रियः। अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यतीति। चामुमुक्षुत्वेपि मुमुक्षुर्वै शरणमहं प्रपद्ये। ततः पदं तत्परिमार्गितव्यं
व्यं यस्मिन्गता न निवर्त्तंते भूयः तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणीति श्रुतिस्मृती द्रष्टव्ये। एवंविधप्रमाणविशिष्टो वेदां
१५ ताधिकारीति निरूपितेर्थेभियुक्तवचनमुदाहरति। उक्तमिति। प्रशांतचित्ताय प्रशांताय जितेंद्रियाय दांताय प्रहीणदोषाय नितांत
निर्मलस्वांताय यथोक्तकारिणे काम्यनिषिद्धवर्जनपुरःसरं नित्याद्यनुष्ठानलब्धेश्वरप्रीतये गुणान्विताय विवेकवैराग्योपर
तितितिक्षासमाधानयुक्ताय सर्वदा गुरुमनुगताय श्रद्धालवे एवंभूताय मुमुक्षवे एतदात्मज्ञानं सततं गुरुणा देयमिति श्लो का

उक्तं च प्रशांतचित्ताय जितेंद्रियाय प्रहीणदोषाय यथोक्तकारिणे। गुणान्वितायानुगता
य सर्वदा प्रदेयमेतत्सततं मुमुक्षवे। विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं॥ ""

६

कार्थः। तदेवमधिकार्यनुबंधो निरूपितः इदानीं विषयानुबंधं व्यपदिशति। विषय इति। क्षीरनीरवत्परस्परविभिन्नयोः समार
नाभिहारस्य कपटाद्यर्थत्वाज्जीवब्रह्मणोरपि स्वरूपतो भिन्नयोरैक्यं मिश्रीभाव इति शंका स्यात्तन्मा भूदिति व्याचष्टे। शु
द्धेति। चैतन्यस्य शुद्धत्वं सर्वधर्मातीतत्वमेकरसत्वं। ननु कथं शुद्धचैतन्यस्याविचारविषयत्वं यावता प्रागपि विचारात्तत्त्वप्र
काशः स्वयमेवावभासत इत्याशंक्य स्वस्वरूपेणावभासमानत्वेपि परिपूर्णसच्चिदानंदप्रत्यक्स्वरूपतया अज्ञायमानत्वाद्विषय
त्वोपपत्तिरित्यभिप्रेत्याह। प्रमेयमिति। प्रमेयत्वं प्रमाणज्ञानत्वं। अयं भावो ब्रह्मात्मवस्तुनो विषयस्य तत्प्रसिद्धौ न विचारप्रवृ राम
त्तिः संभवति। उद्देश्यविषयाऽसिद्धेः। तथाप्ययथावत्प्रसिद्धौ न विचा ६२ १२

प्र१

रप्रवृत्तिरनुपयोगात्। तथा च केनचिद्रूपेणाप्रसिद्धं ब्रह्मात्मवस्तूद्दिश्य विचारेणैतद्याथात्म्यं निर्णेयं। तदिदं ब्रह्मपदस्य निर
तिशयमहत्त्ववृत्तिसामान्येन प्रसिद्धत्वादात्मपदस्य च प्रतीतिसामान्येन प्रसिद्धेरयमात्मा ब्रह्मेत्यादौ समभिव्याहारादेकार्थ्या
त्वं३ पाततः प्रसिद्धं तदुद्दिश्य वस्य च परोक्षसद्वयत्वाद्यनधिकरणस्य देहेन्द्रियमनोबुद्धिप्राणाहंकृतिविलक्षणतत्साक्षिप्रत्यगभिन्न त्व१
सच्चिदानंदानंताद्वयब्रह्मस्वरूपत्वस्य चाप्रसिद्धेः सामान्यतः प्रसिद्धवस्तूद्देशेन तद्विशेषनिर्धारणाय विचारप्रवृत्त्युपपत्तिरिति।
तः१ यद्वा परोक्षं प्रसिद्धं ब्रह्मात्मवस्तूद्दिश्य तत्स्वरूपसाक्षात्काराय विचारप्रवृत्त्युपपत्तिरिति। तथा च श्रुतिः आत्मा वा अरे द्रष्टव्य
: श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यात्मसाक्षात्कारमनूद्य तदर्थं श्रवणमनननिदिध्यासनानां फलोपकार्यंगभावेन सह।
श्रवणमनुष्ठेयं विधत्ते। स्मृतिरपि श्रोतव्यः श्रुतिवाक्येभ्यो मंतव्यश्चोपपत्तिभिः मत्वा च सततं ध्येय एते दर्शनहेतव इति। ननु स १

तत्तैव वेदांतानां तात्पर्यात्। संबंधस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावलक्षणः॥

प्रधानादीनामपि कपिलकणादादिस्मृतिसिद्धानां वेदांतवाक्यविषयत्वात् कथं जीवब्रह्मैक्यस्य विषयत्वसंकीर्तनमिति तत्राह।
मो४ तत्तैवेति। उपक्रमोपसंहारादिभिर्लिंगैर्वेदांततात्पर्ये निरूप्यमाणे प्रत्यक्तत्त्वरूपे ब्रह्मण्येव पर्यवसानदर्शनात्प्रधानादिषु चाद
रि४ र्शनाद्ब्रह्मैव वेदांतविषयो न प्रधानादिस्त्वर्थः। तथा च श्रुतिस्मृती भवतः सर्वे वेदा यत्पदमामनंति। वेदैश्च सर्वैरहमेव वेद्य
इति च। तृतीयमनुबंधमाह। संबंधस्त्विति। तदैक्यं प्रत्यग्ब्रह्मणोरैक्यं तच्च तत्प्रमेयं चेति तथा तस्येति विग्रहः। ननु कथं य
थोक्तप्रमेयस्योपनिषत्प्रमाणबोध्यत्वं निर्धर्मिके तस्मिन् शब्दशक्त्यगोचरत्वादिति चेत्। को भावः शब्दादिहीनस्य वाच्यत्वा
नुपपत्तिरिति चेन्न। अननुक्तोपालंभात्। असंगस्य लक्ष्यत्वानुपपत्तिरिति चेन्न। यथा लक्षणवृत्त्याश्रयणेन ब्रह्मात्मैक्य
प्रतिबोधस्तथोत्तरत्र वक्ष्यामः।

वे॰सा॰ चरमसमनुवेधमाहुः। प्रयोजनमिति। तदेकप्रमेयशब्दः पूर्ववत्। अज्ञानं बन्धस्मारणं तस्य निवृत्तिः प्रयोजनमित्येतावन्मुक्ते सा
टी॰१३ मूलदुःखोन्मूलनलक्षणं वैशेषिकाभिमतं प्रयोजनमभ्युपगतं प्रतिभायात्तन्माभूदिति विशेषणान्तरोपादानं। अ
13 ज्ञाननिवृत्तिरानंदावाप्तिश्च प्रयोजनमित्युक्ते नित्यनिरतिशयसुखाभिव्यक्तिः निःशेषदुःखोच्छित्तिश्च प्रयोजनमिति
तिभाट्टाभिमतप्रयोजनं प्रतिभायात्तन्माभूदिति तत्स्वरूपं तु ज्ञं। ब्रह्मात्मचैतन्यस्य चानंदरूपत्वं प्रतिपादितमधस्तात्।
विचारजन्यज्ञानस्योक्तोभयविधप्रयोजनमित्यत्र क्रमेण श्रुतीः प्रमाणयति। तरतीत्यादिना। आत्मवित् भूमाख्यब्रह्मा
त्मसाक्षात्कारवान् शोकोपलक्षितं संसारमूलाज्ञानं तरतीति श्रुतिकामतिः यः कश्चिद्ब्रह्मपरमात्मानं प्रत्यग्रूपं वेद साक्षात्क

प्रयोजनं तदेकप्रमेयगताज्ञाननिवृत्तिस्तत्स्वरूपानंदावाप्तिश्च। तरति शोकमात्मविदिति श्रुतेः।
ब्रह्म वेद ब्रह्मैव भवतीति श्रुतेः। अयमधिकारी जन्ममरणादिसंसारानलसंतप्तः॥ ॥ ॥

रोति स ब्रह्मैव भवति तद्रूप एव भवतीत्यर्थः। नन्वविद्यानिवृत्तेर्विद्यासाध्यत्वेन प्रयोजनत्वेपि कथं स्वरूपानंदस्य तथात्वं
तस्य नित्यप्राप्तत्वे न विद्यासाध्यत्वाभावादिति चेत्। सत्यं नित्यप्राप्तमप्यानंदात्मब्रह्मरूपमविद्यावस्थायां विस्मृतकंठ
गतचामीकरवदनवाप्तमिव भवति विद्यया त्वविद्यानिवृत्तौ विज्ञातचामीकरवदभिव्यक्तिमापद्यमानमवाप्तमिव
न३ व्यपदिश्यत इति काचिदनुपपत्तिरिति भावः। एवं साधनचतुष्टयसंपन्नस्याधिकारिणो विज्ञातविषयादिमत
यम२ आत्मयाथात्म्यजिज्ञासया गुरूपसत्तिं दर्शयति। सोधिकारीति। मरणादीत्यादिपदाद्रागद्वेषादिग्रहः। संसारानलसंतप्तो गु
रुमुपसृत्य तमनुसरतीत्यन्वयः। उपसरणं समीपगमनं। अनुसरणमनुवृत्तिरिति भेदः। प्रत्युद्धि[illegible]तस्याविलंबेन तच्छो राम
त२ १३

वेशोद्दिष्टं तमाह। प्रदीप्तेति। निदाघमध्याह्नार्कमरीचिसंव्याप्तत्वात् प्रदीप्तशिराः शिशिरतरमधुरजलपरिपूर्णो मेघो हृदो जलतरा हा १
शिः। रिक्तपाणिर्न सेवेद्राजानं देवतां गुरुमिति वचनमाश्रित्योपहारपाणिरिति। उपहार उपायनं पाणौ यस्य सः। श्रोत्रियं ब्रह्म
निष्ठमिति गुरोर्विशेषणे। श्रोत्रियत्वं वेदवेदाङ्गपारगत्वं वेदान्तार्थपारगत्वं वा प्रकृतोपयोगात्। श्रोत्रियग्रहणम् अकामहतत्वा
वृजिनत्वयोरप्युपलक्षणार्थं यश्च श्रोत्रियोऽवृजिनोऽकामहतस्त्व इति श्रुतेः। अकामहतत्वमाब्रह्मलोकानन्दादर्वाचीनेष्वा
त्त्व ५ नन्देष्ववितृष्णत्वं। अवृजिनत्वं यथोक्तकारितया निष्पापत्वं। ब्रह्मनिष्ठत्वमौपनिषदब्रह्मात्मविज्ञानपरिपूर्णत्वमित्यर्थः। उक्तवि
धिनायथोक्तगुरुसमुपसर्पणं विद्यार्थिना वश्यं कर्तव्यमित्यत्र प्रमाणमाह। समिदिति। समिच्च हस्ते गुरोरनुरूपोपायनमात्रोपलक्षण

अतिप्रदीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति। समित्पाणिः श्रोत्रियं
ब्रह्मनिष्ठमित्यादिश्रुतेः। स परमकृपया अध्यारोपापवादन्यायेन तमुपदिशति। तस्मै स विद्वान्प्रपन्नाय स्वात्मत
त्वं प्राहेत्यादिश्रुतेः। असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोऽध्यारोपः॥

परः। आदिशब्दात् आचार्यवान्पुरुषो वेद आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापयदित्यादिश्रुत्यन्तरसंग्रहः। शिष्योपसत्त्यनन्त
श्री ४ रं गुरोस्तत्पदैकमन्दर्शयति। स परमेति। सः गुरुः परमकृपया प्रपन्नजनक्लेशादर्शनजातकरुणा तन्मतिप्रकाशनप्रवृत्तिर्वा। तदुक्तम
भियुक्तैः एतदेव हि दयालुलक्षणं यद्विनेयजनबुद्धिवर्द्धनमिति। उक्तार्थज्ञापिकां श्रुतिं तस्मा इति। तस्मा एतत्प्रोवाच यद्वे
त्यतेन मोपसीदत तस्मा उ हैवं दृष्ट्वा मीत्यादिश्रुत्यन्तरमादिशब्दार्थः। अध्यारोपं सदृष्टान्तं लक्षयति। असर्पेति। ननु का
यमवैनो निरात्मकस्यारोपो यावता क्वचिद्दृष्टपूर्वस्य सत एव क्वचिदारोपो दृष्टः॥ १ठ नि २
स्तु १

वे॰ सा॰
टी॰ १५

उक्तं च भट्टाचार्यैः। अध्यस्यते खपुष्पत्वमसत्कथमवस्तुनि। अज्ञातगुणसत्ताकमध्यारोप्येत वा न वेति। उच्यते संस्कारजन्यो हि।
भ्रमस्तत्सिद्धये पूर्वप्रतीतिमात्रमपेक्ष्यते न पुनः पूर्वप्रतीतस्य परमार्थसत्त्वमपि व्यतिरेकाभावात्। संशयविपर्ययदृष्टेष्वपि।
संस्कारकार्यस्मृतिदर्शनात्। तथाहि लोकेनुभवाः अस्मिन्वल्मीककूटे मम पुरा स्थाणुः पुरुषो वेति संदेह आसीत् अस्मिन्शु
14 क्तिः प्राक्काले रजतमिति भ्रमश्चासीदित्यादिः। न च संशयविपर्यययोरेवेयं स्मृतिर्न तदर्थयोरिति वाच्यं। अर्थस्यतन्नयोस्तयोः स्मृ
तिविषयत्वानुपपत्तेः। तस्मान्निरुपाख्यविलक्षणस्य पूर्वपूर्वभ्रमदृष्टस्योत्तरोत्तरारोपोपपत्तेर्भ्रमप्रवाहस्य चानादित्वेनान्यो
न्याश्रयानवस्थादिप्रसंगानवकाशात्। युक्तं वस्तुनि परमार्थसत्यवस्तुनो निर्वचनीयस्यारोपस्तदर्थः। वस्तववस्तुनी क्रमेण।
लक्षयति। वस्तु सच्चिदित्यादिना। ननु ब्रह्मण एव वस्तुत्वे जीवस्याप्युक्तत्यादेश्चावस्तुत्वात्कर्तृत्वाद्यध्यारोपे चाव्याप्तिः स्यादिति चेत्

वस्तु सच्चिदानंदाद्वयं ब्रह्म अज्ञानादिसकलजडसमूहोऽवस्तु॥

त्व

न ब्रह्मण एव जीवस्यापि कल्पितत्वात्कर्तृत्वादेश्च सोपाधिकभ्रमतयोपाध्यनुरक्ते ब्रह्मण्येवाध्यारोपात् शुक्त्यादेरज्ञाताद्य। र पि
प५ धिष्ठानचैतन्यावच्छेदकत्वेनाधिष्ठानत्वमुपचर्यते न पुनस्तस्यैवाधिष्ठानत्वं। अज्ञातं हि वस्त्वारोपाधिष्ठानं। न च शुक्त्यादेर
ज्ञातत्वमस्ति। जडत्वात्। चिन्मात्रनिष्ठत्वाच्चिन्मात्रविषयत्वाच्चाज्ञानस्य। तदुक्तं यस्याज्ञानं भ्रमस्तस्य भ्रांतः सम्यक् च वेत्ति
सः। जडं [illegible] न विद्याद्विद्यतावन्नातोऽज्ञानं जडाश्रयमिति। ततश्च सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदावभासोऽध्यारोप इत्युक्तं।
भवति। एतेन चिज्जडयोः परस्परतादात्म्याध्यासेऽशून्यमेव जगतस्तत्त्वं स्यादध्यस्तस्य मिथ्यात्वादिति केषांचिच्चोद्यं निरस्तं
भ्रमकालेऽपि स्फुरद्देशस्य मिथ्यात्वेऽप्यपरिस्फुरतोऽंशांतरस्य विद्यमानत्वात्। तदुक्तमभियुक्तैः अध्यस्तमेव हि परिस्फु

राम
१५

तिभूमे घु रज्जुत्वशुक्तिशकलत्वमरुद्वितित्व चंद्रैकताप्रभृतिकानुपलंभनेनेति। किंचानन्तद्वयमिहाध्यसितव्यमिथः
स्याच्चेत्तदाभवति चोद्यमिदं त्वदीयं सत्यानृतात्मकमिदं मिथुनं मिथश्च दध्यस्यते किमिति शून्यकथाप्रसंग इति च। तस्माच्छु
क्तमुक्तं वस्तु सच्चिदानंदाद्वयं ब्रह्म तस्मिन्नज्ञानतत्कार्याखिलजडसमूहस्यावस्तुनोध्यारोप इति। अज्ञानं व्युत्पादयति। अज्ञा
ज्ञानमिति। तुशब्दो मतांतरेभ्यो वैशेष्यद्योतनार्थः। तमेव विशेषं दर्शयति। सदसद्भ्यामित्यादिना। ज्ञानविरोध्यज्ञानमित्युक्ते
ज्ञानप्रागभावे प्रसंगं व्युदस्यति। भावरूपमिति। उत्तरज्ञानविरोधिपूर्वज्ञानव्युदासाय सदसद्भ्यामनिर्वचनीयमिति। मिथ्या
सा६ ज्ञानव्युदासाय त्रिगुणात्मकमिति। यद्वा ज्ञानविरोधित्वं ज्ञानापनोद्यत्वं तदेवाज्ञानत्वमित्यज्ञानलक्षणं। न च ब्रह्मात्मैकत्वज्ञा
नापनोद्यप्रपंचेतिव्याप्तिस्तस्याज्ञानोपादानकत्वेनाज्ञानानतिरेकात्। नाप्यज्ञानात्मसंबंधेतिव्याप्तिः। असंगस्वभावस्य चिदा

अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किंचिदिति वदंति। ब

त्मनोज्ञानसंबंधस्याज्ञानाधीनत्वात्तस्याप्यज्ञानात्मत्वोपपत्तेरतो नानयोर्लक्षणबहिर्भाव इति न लक्षणस्यातिव्याप्तिः। अव्या
प्तिः प्रागभावयोस्तु प्रोक्तैव नास्ति ज्ञानेनाज्ञानबाधस्याप्रसिद्धत्वात्। न च पूर्वज्ञानेज्ञानप्रागभावे चातिव्याप्तिः। पूर्वज्ञानस्य ज्ञा
नापनोद्यत्वनियमाभावात्। इच्छादिवृत्तेरुत्तरोत्पत्त्यापि तदपनोददर्शनात्। इष्टं च नियमेन ज्ञानापनोद्यस्याज्ञानत्वाभ्युपगमात्।
प्रागभावस्य च प्रतियोग्युत्पत्तिमात्रविरोधिनस्तदपनोद्यत्वाभावात्। न ह्यनुत्पन्नः प्रतियोगी कस्यचिदपनोदकः संभवति। अतो
न तयोरतिव्याप्तिः। नन्वज्ञानस्यापि ज्ञानोत्पत्तिनांतरीयकतयाविनाशाश्रयणात्कथं ज्ञानापनोद्यत्वमिति चेन्न। ज्ञानोत्पत्त्यनंतर
विलंबाभावाभिप्रायेणाज्ञाननाशस्य ज्ञानोत्पत्तिनांतरीयकतावाचोयुक्तेराश्रयणात्। भावाभावयोस्तु लक्षणमात्रमपि सहभावा
नुपपत्तेरित्यस्ति प्रागभावाद्वैषम्यमज्ञानस्येति। सदसद्भ्यामनिर्वाच्यमित्यपरं लक्षणं। अत्रापि पूर्ववदेवातिव्याप्त्यादिपरिहारो द्रष्ट

वे॰सा॰ ध्यः। नेदमसंभवि अज्ञानस्य सत्त्वे चिदात्मवद्बाधाभावप्रसंगात्। असत्त्वे च वंध्यासुतादिवदपरोक्षप्रतिभासानुपपत्तेः। बा
टी॰१५ धप्रतीत्योरध्यासज्ञाने प्रसिद्धत्वाद्युक्तं तस्यानिर्वचनीयत्वं। सदसत्त्वपक्षयोरुक्तदूषणमुपजीव्य मिथ्याज्ञानसंस्का
15 रोऽज्ञानमसत्प्रकाशानप्रकाशित्वेनासद्वेतिमतद्वयं निरसनीयं मिथ्याज्ञानमात्मगुणोऽज्ञानमिति पक्षं निरस्यति। त्रिगुणा
त्मकमिति। गुणा लोहितशुक्लकृष्णा अज्ञानकार्येषु तेजोऽबन्नेष्ववांतरप्रकृतिषु प्रसिद्धाः। यदग्ने रोहितं रूपं तेजसस्त
द्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति श्रुतेः। तथा च कार्यगतत्रिरूपेण कारणमप्यज्ञानमव्याकृतात्मकं त्रिरूपेण त्रिगुणा
त्मकमिति यावत्। तथा च न्यायः ज्योतिरुपक्रमा तु तथा ह्यधीयत एक इति। यद्वा रजःसत्त्वतमोलक्षणास्त्रयो गुणास्तद्युक्त
मज्ञानं त्रिगुणात्मकं गुणगुणिनोरभेदविवक्षया त्रिगुणात्मकमित्युक्तं। तथा च गुणस्य गुणवत्त्वानुपपत्तेर्न मिथ्याज्ञान
मज्ञानमित्यर्थः। ज्ञानाभावोऽज्ञानमिति मतं निरस्यति। भावरूपमिति। अयमर्थः अभावप्रतियोगि यज्ज्ञानं तत्किं साक्षिचैत
न्यस्यात्मा ज्ञो चेतेत्यादिश्रुतेस्तस्यापि ज्ञानत्वप्रसिद्धेः। किं वांतःकरणवृत्तिर्विज्ञानेन वा ऋग्वेदं विजानातीति विज्ञानश
ब्देन बुद्धेः श्रवणात्। अथवात्मगुणस्तथात्वेन च ज्ञानस्य वैशेषिकतंत्रे प्रसिद्धत्वात्। तत्राद्यो नाभावप्रतियोगी तस्य
नित्यत्वात्। द्वितीये ज्ञानशब्दस्योपचारिकत्वेन तदभावस्यामुख्यताज्ञानत्वायोगात्। येन वा पश्यतीत्यारभ्य प्रज्ञानेत्रं
प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोक इत्यंतेन प्रज्ञाशब्दवाच्यप्रत्यक्चैतन्यव्याप्तस्यैव चक्षुरादिद्वारकबुद्धिपरिणामस्य संकी
र्तनात्। सांख्यपक्षमाश्रित्यानौपचारिकत्वस्वीक्रियमाणेऽपि न वृत्त्यभावोऽज्ञानं वृत्त्यभावशब्देन वृत्त्युपादाना। राम
बुद्धिस्वरूपावस्थानमात्ररूपेणाभिहितया तस्य तः पक्षां ॥ रामरामरामरामरामरामरामरामराम श्रीरामायनमः। १५

तरं परिशिष्यते तत्रेदं वक्तव्यं ज्ञानविशेषाभाव एवाज्ञानं ज्ञानसामान्याभावो वेति नाद्यो मूढोऽहं न किंचिज्जानामीत्यनुल्लिखित
विषयविशेषस्याप्यज्ञानस्यानुभवात्। न च तत्रापि विषयविशेषपर्यवसायित्वं कल्प्यत इति वाच्यं। विनानुपपत्तिं सामान्या
बुद्धेर्विशेषालंबनत्वे सामान्यबुद्धिविलोपप्रसंगात्। तथा च घटवत्यपि भूतले घटसामान्यनिषेधप्रसंगः सुषुप्त्यभावप्रसंगश्च
स्यात्। तस्माज्ज्ञानसामान्याभावोऽहमज्ञ इत्युल्लिख्यत इति वाच्यं। तत्र चाभावज्ञानस्य धर्मिप्रतियोगिज्ञानसापेक्षत्वादात्मनि
धर्मिणि ज्ञाने च प्रतियोगिनि विज्ञायमाने तस्मिन्नेवात्मनि कथं ज्ञानाभावग्रहः। अभावप्रतियोगिनो ज्ञानस्य तत्रैव वर्त्त-
मानत्वात्। तयोरविज्ञायमानयोरपि कथं तत्राभावग्रहः। कारणाभावात्। षष्ठप्रमाणपक्षेऽप्ययं न्याय ऊहनीयः। नन्वनु
पपत्तौ सत्यां सामान्यबुद्धेरपि विशेषालंबनत्वं कल्प्यते यथा घटवत्यपि भूतले घटो नास्तीति बुद्धेर्विवक्षितघटाभावविष
यत्वं तद्वदिहापि सामान्याभावस्य यत्किंचित्प्रतियोगिसत्त्वविरोधादात्मनि विज्ञायमाने तस्मिन्ननुपपत्तेर्न किंचिज्जाना
मीति बुद्धेर्ज्ञानविशेषाभावविषयत्वं कल्प्यत इति चेन्न। अनयैवानुपपत्त्या भावांतरविषयत्वस्यैव कल्पनीयत्वात्। नहि
मूढोऽहं मामन्यं किंचिदपि न जानामीत्यनुभवे किंचिद्विषयांतरमवशिष्यते यज्ज्ञानाभावविषयत्वमस्य कल्प्येत यथास्मिन्भू
तले न कोपि घटोऽस्तीति प्रत्यये घटविशेषस्यानवशेषस्तद्वत्। ननु प्रसिद्धभावांतरकल्पनाद्वरं प्रसिद्धस्याभावस्यैव यथाकथंचिदप्य
ज्ञानबुद्धेर्विषयत्वकल्पनमिति चेन्न। अत्यंतमप्रसिद्ध्यभावात्। देवात्मशक्तिं स्वगुणैर्निगूढां मायां तु प्रकृतिमिति च श्रुतिवाक्य
योगुणावत्त्वेनोत्पद्यमानजगदुपादानत्वेन च प्रसिद्धत्वात्। तस्मान्नाभावोऽज्ञानं किंतु भावांतरमेवेति। ननु भावत्वमप्यज्ञान
स्यानुपपन्नमनादेस्तस्य भावरूपत्वे चिदात्मवदनिवृत्तिप्रसंगादनिर्मोक्षापत्तेरित्यत आह। यत्किंचिदिति। अयमर्थः। नास्माभिरा
ज्ञानस्य भावत्वं परमार्थसत्त्वाभिप्रायेणोच्यते किंत्वभाववैलक्षण्याभिप्रायेण। न च भावाभावयोः परस्परप्रतिषेधेऽन्यतरविधिनां

तरीयकत्वात्प्रकारांतरानुपपत्तिरिति वाच्यं।
स्त्रीपुंप्रक

८५

वे॰सा॰
टी॰१६
16 क

त्योः परस्परप्रतिस्पर्द्धिनोर्निषेधे तदन्यस्य नपुंसकस्येव भावाभावान्यस्याज्ञानस्योपपत्तेः। अथ तत्र प्रमाणांतरेण तृतीया
प्रकृतिरुपलभ्यत इति मतं तर्हि ह्यप्रसक्तिप्रमाणप्रतीतिबाधान्यथानुपपत्तिरिति संतोष्टव्यं। वस्तुतस्तु नात्मा
कमत्वं तमोगृहो ज्ञाने सर्वानुपपत्तेरलंकारत्वात्। तदुक्तं अविद्याया अविद्यात्वमिदमेव हि लक्षणं यत्प्रमाण
सहिष्णुत्वमन्यथा वस्तु सा भवेदिति। सेयं भ्रांतिर्निरालंबा सर्वन्यायविरोधिनी। सहते न विचारं सा तमो यद्वद्
दिवाकरमिति। इष्टसिद्धावपि दुर्घटत्वमविद्याया भूषणं न तु दूषणं कथंचिद्घटमानत्वे विद्यात्वं दुर्घटं भवेदिति।
।तस्मात्सत्त्वेनासत्त्वेन सदसत्त्वेन सावयवनिरवयवोभयात्मकेन वा भिन्नाभिन्नोभयरूपत्वेन वा निर्वक्तुमशक्य
त्वेनानिर्वचनीयमज्ञानं सवितरादिबाधपरिकल्पितांधकारवत्तु यत्किंचिदिति पदं तिरद्धा इति सिद्धं। इदानीं पानि

अहमज्ञ इत्यनुभवात्। देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेश्च।

रूपितमज्ञानमेव नास्तीति विवदमानं प्रतिबोधयितुं तत्रानुभवश्रुती प्रमाणयति। अहमज्ञ इत्यादिना। अनुभवस्यास्य ज्ञानाभा
वविषयत्वं प्रतिक्षिपन् निर्विकल्पकघटितप्रतियोगिकस्य ज्ञानसामान्याभावस्य स्वात्मनि प्रत्यक्षायोग्यत्वाच्च। न चाभावरूपमप्या
ज्ञानमात्मनि ज्ञायमानेन न गृहीतुं शक्यते तस्य ज्ञानविरोधित्वादिति वाच्यं। स्वप्रकाशसाक्षिचैतन्येन तस्य विरोधाभावात्। अतः कर
णवृत्त्यैव तु विरोधादहमज्ञ इत्यहंकारगर्भस्य चोल्लेखस्य साक्षिप्रकाशिताज्ञानविषये स्फुटतरव्यवहारमात्रत्वाच्च न काचि
दनुपपत्तिरिति भावः। देवस्य स्वयंप्रकाशस्यात्मनः शक्तिं शक्तिवत्परतंत्रां स्वगुणैः शुक्लादिभिः सत्त्वादिभिर्वा निगूढामालिंगितां
ते ध्यानयोगानुगता अपश्यन्निति संबंधः। अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः। नाहं प्रकाशः सर्वस्य योगमायासमावृत इत्यादि

राम
१६

त

चास्ति प्रकाशत इति व्यवहारपुष्कलकारणे सति नास्ति न प्रकाशत इति तद्विपरीतव्यवहारस्यात्मन्यावरणमंतरेणानुपपत्तिः।

:। श्रोतव्य इत्यादिना आत्मयाथात्म्यज्ञानाय श्रवणादिविधानानुपपत्तिश्चेत्यर्थापत्तिद्वयं चकारेण समुच्चीयते। नन्वज्ञामे

कामिं द्रोमायाभिरित्यादिश्रुतिभ्य एकत्वानेकत्वयोरज्ञाने विशतिपत्तौ कः समाधिरिति वीक्षायामाह। इदमिति। व्यष्टिर्वि

शेषः समष्टिः सामान्यं व्यवह्रियते श्रुत्यादिष्विति शेषः। अयं भावो यो यदनुरक्तबुद्धिविषयो नियतः स तदात्मको यथा मृदनु

रक्तबुद्धिविषयो घटो मृदात्मको दृष्टस्तथा सामान्यानुरक्तबुद्धिविषया विशेषाः सामान्यात्मका इति युक्तं सामान्यविशेषयोरत्य

न्तभेदे गवाश्ववत्सामान्यविशेषभावानुपपत्तेः। भेदाभेदौ त्वेकस्मिन्नप्रमाणिकौ वस्तुनो द्विरूपत्वानुपपत्तेः। अभेदपक्षे तु कथं चिद्भेद

इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति व्यवह्रियते। तथाहि यथा वृक्षाणां समष्ट्यभिप्रायेण वन

मित्येकत्वव्यपदेशः। यथा वा जलानां समष्ट्यभिप्रायेण जलाशय इति तथा नानात्वेन प्रतिभासमानानां जी

वगतानामज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः। ॥ कल्पनया सामान्यविशेषव्यवहारोपपत्तेः समुद्रतरंगादि

वज्जलतरंगचंद्रादिवद्वा। तथा चाज्ञानस्यैकस्यैव सतः सामान्यविशेषभावे नैकानेकत्वव्यवहारः श्रौतो न विरुध्यत इति। एतदेव दृ

ष्टांतैरुपपादयितुमुपक्रमते। तथाहीत्यादिना। पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षीभूत्वा पुरः पुरुष आविशत् इत्या

रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणायेति मंत्रद्वयानुसारेण ज्ञानतत्कार्यावच्छिन्नो ज्ञानतत्कार्यप्रतिबिंबितो वा चि

दात्मा जीवेश्वरभावं भजत इति मतद्वयमुपलभ्यते। द्वयोरुपादानमिति सर्वत्र वनवृक्षजलाशयजलकीर्तनाभिप्रायो वो

द्धव्यः। नानात्वेनेत्यादेरयमर्थः। अज्ञानं किं ब्रह्मनिष्ठमुत जीवनिष्ठं नाद्यो नित्यशुद्धत्वादिस्वभावविरोधात्। नाद्वितीयो न्यो

ज्ञानम १

वे॰ सा॰ टी॰ १७ षयमित्याश्रयविषयोः सापेक्षताप्रतीतेर्न निराश्रयमस्तीति प्रतिपत्तुं शक्यं तत् स च जीवाश्रयत्वे जीवभावस्याप्यज्ञानाधीनत्वात्सिद्धे
जीवभावेऽज्ञानस्य साश्रयत्वसिद्धिस्तत्सिद्धौ च जीवत्वसिद्धिरिति कथं नान्योन्याश्रयः । नन्वनादित्वादज्ञानजीवभावप्रवाह
17 स्य बीजांकुरवन्नान्योन्याश्रय इति चेन्नैवं । कल्पनाया अनेकबीजांकुरव्यक्तिवदनेकाज्ञानजीवव्यक्तीनां सत्त्वे प्रमाणाभावात् । न
नु सता सोम्य तदा संपन्नो भवति तद्धेदं तर्ह्यव्याकृतमासीदित्यादिश्रुतिभ्यः सुषुप्तिप्रलययोर्जीवस्य परमात्मैकभावापत्तिश्रवणात्पुनः
प्रबोधसर्गयोर्जीवभावापत्तेरवगम्यमानत्वाच्च तदा तद्विभागहेतोः संस्काररूपस्याज्ञानस्यापि कल्प्यमानत्वात्कथं न बीजांकुरन्याय
: प्रामाणिक इति चेन्न । तर्हि किमिदानीं सुषुप्त्यादिकाले जीवस्य जीवत्वं नास्तीति विवक्षितं । हन्त तर्हि कृतनाशाकृताभ्यागमप्रसंगो ।
मुक्तानामपि संसारित्वप्रसंगश्च दुर्वारः स्यादविशेषात् । किं च सुषुप्त्यादावज्ञानसद्भावे तस्य ब्रह्माश्रितत्वप्रसंगोऽसद्भावे सुषुप्तानां पुन
रनुत्थानप्रसंगः । त इह व्याघ्रो वा सिंहो वेत्यादि सत्संपन्नवाक्यशेषासंगतिप्रसंगश्चेत्यसमंजसमेतत् । अथाज्ञानजीवयोः स्वरूपे
णैवानादितयाश्रयाश्रयिभावस्य नित्यसिद्धत्वान्नान्योन्याश्रय इति मतं तदपि न । ब्रह्मण्यज्ञानाभावप्रसंगात् । नायमिष्टप्रसंगः
सोऽकामयत तदात्मानं स्वयमकुरुतेत्यादिश्रुतिभिर्ब्रह्मणो जगत्कारणे कामयितृत्वादेरज्ञानकार्यस्याश्रूयमाणत्वात् । न च दृष्टिगत
पीतिमन्नः प्राग्वत्समारोपवज्जीवगताज्ञानविक्षेपस्य कामयितृत्वादेस्तद्विषये ब्रह्मणि समारोपः श्रुत्या कीर्त्यत इति वाच्यं । तथा स
ति जीवानामेव जगत्सर्गस्थितिलयोपादानत्वात्सर्वं खल्विदं ब्रह्मेत्यादिब्रह्मसामानाधिकरण्यं जगतः श्रूयमाणमेकविज्ञानेना
सर्वविज्ञानप्रतिज्ञानं च पीड्येत जीवस्य ब्रह्माभेदात्सर्वमेवोपपद्यत इति न कश्चिद्दोष इति चेत् । तर्हि जीवपक्षोपात्तं परित्यज्य ब्रह्म
ण एव जगत्सृष्ट्यादि यथाश्रुतं स्वीकर्तव्यं विना तस्याज्ञानाश्रयत्वं कूटस्थस्य न कामयितृत्वादीत्युक्तं । तस्य च जीवाद्विभक्तस्या राम
ज्ञानाश्रयत्वेपि तत्रापि स्यादन्योन्याश्रयः । न तु ब्रह्मणो जगत्कारणत्वादिनिर्वाहकमज्ञानं मायाशब्दवाच्यमन्यदेव जीवगतक १७

जीवाद्विभक्तत्वे सति ब्रह्मणोऽज्ञानाश्रयत्वसिद्धिरज्ञानसिद्धौ च जीवब्रह्मणोर्विभागसिद्धिरिति ॥ १ ॥ =

न्नीत्वाद्यवभासहेतुभ्यो ज्ञानेभ्योऽविद्याशब्दवाच्येभ्य इति चेन्न। मायाविद्ययोः श्रुतिस्मृतिसूत्राभियुक्तवचनैरेकत्वस्य दृढं निर्
रूपितत्वात्। अनिर्वचनीयत्वे सति तत्त्वावभासप्रतिबंधविपर्ययावभासहेतुत्वस्य लक्षणस्य तुल्यत्वात्। अविद्याभेदे च कल्पनागौ
त्रि॰ ३ रवदोषात्। एकाविद्यापक्षेप्यनंतविक्षेपशक्तिकल्पनया जाग्रत्स्वप्नबंधमोक्षदर्शनाभुजंगादिव्यवहारव्यवस्थोपपत्तेः। न च तत्त्वा
पि कल्पनागौरवं समानं। धर्मिभेदकल्पनातो धर्मभेदकल्पने लाघवादित्यास्तां विस्तरः। अतश्चिन्मात्रनिष्ठमज्ञानं तस्य जीवब्रह्म
विभागहेतुर्ब्रह्मणो जगत्स्रष्टृत्वादेर्जीवस्य कर्तृत्वादेश्च हेतुरित्यंगीकर्तव्यं। न च चिन्मात्रस्य स्वप्रकाशत्वादज्ञानाश्रयत्वविरो
धः। जीवपक्षेपि तुल्यत्वात्। अंतःकरणपरिणामोपहितस्यैव चैतन्यस्याज्ञानविरोधित्वात्। न च ज्ञानवदज्ञानस्याप्येकाश्रयविषय
त्वानुपपत्तिः। आवरकत्वेनापवरकस्थतमोवत्तदुपपत्तेः। तदुक्तमभियुक्तैः। आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः इति। तस्मादेकमज्ञानं चिन्मात्राश्रयमिति स्थिते जीवाश्रयायामेवाहमज्ञ विषय॰
इति स्फुटतरव्यवहारात्तदपेक्षया जीवगताज्ञानमित्युक्तमिति। अनये वदंति जीवाश्रया ब्रह्मपदा ह्यविद्या तत्त्वविन्मतेति प्राचां।
वचनं योजनीयं। ननु नानात्वेन प्रतिभासमानानां जीवानामेकाज्ञानोपाधिकत्वे एकमुक्तौ सर्वमुक्तिप्रसंग इति चेन्नायं दोषः। ए
कस्यैव जीवत्वादितरेषां तद्दृष्टिविजृंभितत्वेन ततोनतिरेकात्। तर्हि कोसौ जीवो यद्दृष्टिविजृंभितं जीवांतरमिति चेत्। य एव पश्यति
स एवाहं तु संसारिणमात्मानमन्यांश्च मद्विधान् जीवान्पश्यामीति च। तर्हि त्वमेव जीवस्त्वदविद्ययावयमन्ये च जीवा बद्धा मुक्ताः सु व४
खिनो दुःखिनश्चेत्येवं विचित्राः कल्पितास्तावद्ब्रह्मसाक्षात्कारमविसंवादिताः प्रतिभासंते स्वप्न इवाप्रबोधं। जाते तु ब्रह्मात्मसा
क्षात्कारे सर्वमेव त्वदृष्टिविजृंभितं त्वया सह मोदिष्यते। त्वत्सुषुप्ताविवेति। इयांस्तु पुनर्विशेषः सुषुप्तावस्य ज्ञानं सर्वक
र्यसंस्कारोपरंजितं पुनर्व्यवहारप्रवर्तकं। मुक्तौ तु तस्य ज्ञानेन बाधितत्वात् पुनर्व्यवहाराभाव इत्यलं प्रसंगागतप्रपंचेन। ता१

वे॰ सा॰ वनवृक्षयोर्जलाशयजलयोर्वा सामान्यविशेषभावो नास्तीति यद्यपि दार्ष्टांतिके नवैषम्यं तथापि समुदायसमुदायिनोरेकत्वे दृष्टांत
टी॰ १८ दार्ष्टांतिकयोः साम्यात्तदंशेन च साम्यस्याविवक्षितत्वान्न कश्चिद्दोष इति गमयितव्यं। अज्ञानैकत्वव्यपदेशिनीं श्रुतिं पठति। अ
जामेकामिति। आदिपदान्मायां तु प्रकृतिं विद्यात्। तरत्यविद्यां विततां। अक्षरात्परतः परः। तद्धेदं तर्ह्यव्याकृतं तम आसीत्। तम
18 सा गूढमित्याद्येकवचनांतश्रुत्यंतरग्रहः। एकमेवाज्ञानं समष्टिव्यष्टिभेदभिन्नं परिकल्प्य समष्ट्यज्ञानोपधाननिबंधनं चैत
न्यव्यवहारं वक्तुं समष्टिं विशिनष्टि। इयमिति। उत्कृष्टस्योपाध्यंतरानुरक्तत्वाऽप्रतिहतज्ञानात्मकस्य चैतन्यस्योपाधितया विशु
द्धरजस्तमोऽभ्यामनभिभूतं सत्त्वं प्रधानं यस्याः सा तथाविधेयं समष्टिरित्यर्थः। समष्ट्यज्ञानोपहितचैतन्यस्य व्यपदेशभेदं दर्शयति।

अज्ञामेकामित्यादिश्रुतेः। इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना। एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वनियं
तृत्वादिगुणकं सदव्यक्तमंतर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते। सकलाज्ञानावभासकत्वात्। यः स
र्वज्ञः सर्ववित् इत्यादिश्रुतेः।

ति। एतदिति। परमार्थतो संगस्यापि चैतन्यस्याध्यासिकसंबंधसंबद्धाज्ञानद्वारा सर्वावभासकत्वेन सर्वमर्यादाविधारकसत्तारूपत्वेन
सर्वेशीवप्रवर्तकत्वेन च लब्धसर्वज्ञत्वादिगुणकस्य सदव्यक्तमंतर्यामीश्वर इत्यादिव्यपदेशो भवतीत्यर्थः। उक्तेऽर्थे हेतुमाह।
सकलेति। सकलाज्ञानं समष्ट्यज्ञानं। अवभासकत्वशब्दो विधारकत्वादेरप्युपलक्षणार्थः। सर्वविक्षेपसंस्कारवत्त्वादज्ञान
स्य सत्कार्यवादाश्रयणाच्चाव्याकृताद्यवस्थास्वपि समष्ट्यज्ञानस्य सर्वत्वमिति द्रष्टव्यं। उक्तव्यपदेशिकां श्रुतिमाह। यः सर्वज्ञ इ
ति। सर्वज्ञः सामान्यतः सर्ववित् विशेषत इति भेदः। आदिशब्दात्तदेव सौम्यंदराय सेतुर्विधरणः। एष त आत्मांतर्याम्यमृतः। महतः रा म
परमव्यक्तं यतो वा इमानि। यः परः स महेश्वर इत्यादिश्रुत्यंतरग्रहः॥ १८

उपहितस्य व्यपदेशभेदमुक्त्वोपाध्योरपि तं सहेतुकमाह। अस्येयमिति। अज्ञानमिदंशब्दार्थः। आनंदप्रचुरत्वमुपहितधर्मः आ-
च्छादकत्वमज्ञानधर्मः तदुभयाऽविवेकात्कारणमज्ञानमानंदमयकोश इत्यर्थः। सर्वे आकाशादय उपरमंत्यस्मिन्निति सर्वोपर-
मोऽज्ञानं तादृग्भावात्सुषुप्तिर्महासुषुप्तिः प्रलय इति यावत्। यतः सर्वोपरमत्वमत एवेति योजना। स्थूलप्रपंचो विराट् सूक्ष्मप्रपं-
चो हिरण्यगर्भः। एवं समष्ट्यज्ञानं साभासं सव्यपदेशं निरूप्य व्यष्ट्यज्ञानमपि सदृष्टांतं तथा निरूपयति। यथा वनस्येत्यादिना। ह्येवम-
नेकत्वव्यपदेशोऽज्ञानस्येति तदाह। इंद्र इति। इंद्रः परमेश्वरः प्रकरणात्स मायाभिर्मायाविद्योपशक्तिभिर्विविदिप्तेषु देहेष्विंद्रियांतःकरणे-

त्वात्कारण॰ अस्येयं समष्टिरखिलकारणशरीरमानंदप्रचुरत्वात्कोशवदाच्छादकत्वाच्चानंदमयकोशः सर्वोपरमत्वात्सुषुप्तिरत-
एव स्थूलसूक्ष्मप्रपंचलयस्थानमिति चोच्यते। यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशः यथा वा ज-
लाशयस्य व्यष्ट्यभिप्रायेण जलानीति तथाऽज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः इंद्रो मायाभिः पुरुरूप
ईयत इत्यादिश्रुतेः। अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः। इयं व्यष्टिर्निकृष्टोपाधितया मलिन-
सत्त्वप्रधाना। एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते। एकाज्ञानावभासकत्वात्॥ ॐ॥

सुप्रतिविंवितः पुरुरूपो बहुरूपः सन्नीयते प्रकाशत इति श्रुत्यर्थः। आदिशब्दाद्य एको जालवानीशत ईशनीभिरित्यादिश्रुत्यंतरग्रहः।
एकस्मिन्नज्ञाने व्यष्टिसमष्टिशब्दप्रयोगे निमित्तमाह। अत्रेति। अज्ञाने सप्तम्यर्थः। व्यस्तव्यापित्वेन कार्योपाधिजीवव्यापित्वावभासेन
व्यष्टिताव्यपदेशः। समस्तव्यापित्वेन कारणोपाधि सर्वज्ञाविभक्तसर्वव्यापित्वेन समष्टिताव्यपदेश इत्यर्थः। निकृष्टोपाधितयेति॥
ज्ञानप्रतिबंधकारणवान्न जीवो निकृष्टस्तस्योपाधितयेत्यर्थः। मलिनं रजस्तमोभ्यामभिभूतं सत्त्वं प्रधानं यस्याः सा तथा रजस्तमसोः
स्वातंत्र्येण प्रतिविंबोद्ग्राहकत्वायोगादिति भावः। एतदुपहितं व्यष्ट्यज्ञानोपहितं। एकाज्ञानावभासकत्वात्। अज्ञानैकदेशावभा-

प्रकाशितिवचनात्॥

व्यष्ट्यज्ञानोपहितस्य प्राज्ञशब्दवाच्यत्वे कारणमाह। अस्येति। अस्य जीवस्यास्पष्टोपाधितया रजस्तमोभ्यामभिभूतसत्त्वप्रधानव्य-
ष्ट्यज्ञानोपाधिकत्वेन हेतुनाऽनतिप्रकाशकत्वाभावात्प्राज्ञशब्दवाच्यत्वमित्यर्थः। प्रायेणाज्ञः प्राज्ञ इत्युक्तं भवति। पूर्ववदुपहितस्य व्यप-
देशमुक्त्वोपाधेरप्याह। अस्यापीति। अपिशब्द ईश्वरोपाधिदृष्टान्तार्थः। अहंकारादेः सुषुप्त्याद्यवस्थायां संस्कारावशेषेणावस्थितस्य।
त्वा कारणमित्यर्थः। आनंदप्रचुरत्वादेवेत्येवकारः कोशवदाच्छादकत्वादिति हेत्वन्तरसमुच्चयार्थः। यद्वा आनंदप्रचुरत्वाद्धेतोरेवेति भिन्न-
19 क्रमः तस्मिन्पक्षे कोशवदाच्छादकत्वादित्यनुषंजनीयं सर्वशब्दो जाग्रत्स्वप्नविषयः शेषमतिरोहितार्थं। सता सौम्य तदा संपन्नो भव-
२६ तीत्यादिश्रुतेः सुषुप्ते प्राज्ञस्येश्वरसंपत्त्यवगमात्प्राज्ञेश्वरयोरेकत्वं तदवस्थयोरप्यव्याकृतसुषुप्त्योरेकत्वं सिद्धवत्कृत्य तयोस्त-

अस्य प्राज्ञत्वमस्पष्टोपाधितयानतिप्रकाशकत्वात्। अस्यापीयमहंकारादिकारणत्वात्कारणशरीरमानंद-
प्रचुरत्वादेवहेतोरानंदमयकोशः सर्वोपरमत्वात्सुषुप्तिः। अत एव स्थूलसूक्ष्मप्रपंचलयस्थानमिति
चोच्यते तदानीमेतावीश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानंदमनुभवतः॥ श्री०

दवस्थासंपन्नं भोगं दर्शयति। तदानीमिति। तयोरप्यवस्थयोर्जीवावच्छेदकस्य व्यष्ट्यज्ञानस्यैकेनापि रूपेणास्थितत्वादेतावित्यदि-
द्विवचनोपादानं सर्वात्मनैक्ये पुनरुक्त्यानानुपपत्तेः। आनंदस्वरूपानंदमनुभवतः आनंदशब्दोऽज्ञानतत्साक्षिणोरप्युपल-
क्षणपरः। तदानीमखंडात्मस्वरूपचैतन्येनैवानंदाद्यनुभवेऽभ्युपगम्यमाने स्वरूपस्य नित्यत्वात्तज्जन्यसंस्काराभावेनावस्था-
न्तरस्मरणरूपपरामर्शानुपपत्तेस्तदनुकूलमुपाधिविशेषं कल्पयति। अज्ञानवृत्तिभिरिति। अंतःकरणादेरप्यज्ञानका-
र्यत्वेन तदात्मकत्वात्तदपि प्रायोऽज्ञानशब्दो मा भूदिति विशिनष्टि। सूक्ष्माभिरिति। दुर्लक्ष्यत्वमतिसूक्ष्मत्वं तासां वृत्तीनां
जडत्वात्कथं ताभिरानंदाद्यनुभव इत्यत आह। चैतन्येति। चैतन्यव्याप्ताभिरित्यर्थः। तथा च वृत्तिविनाशात्तद्विशिष्टचैतन्य

तत्रप्रमाणमाह। आनंदभुगिति। चेतोमुखश्चैतन्यदीप्ताज्ञानवृत्तिप्रधानः। आदिपदात्सुषुप्तिकालेसकलेविलीनेतमोभिभू
तः सुखरूपमेतीत्यादिश्रुत्यंतरसंग्रहः। तच्चैवानुभवमपिप्रमाणयति। सुखमिति। नचायंसुखपरामर्शोदुःखाभावविषयः। तस्यतत्रान
नुभूतत्वात्। तदनुभवसामग्र्याश्चनिरूपयितुमशक्यत्वात्। विस्तृतंचैतदद्वैतसिद्धिरित्युपरम्यतेसंग्रहाधिकारात्। उक्तोपाध्योस्तदुपहित
योश्चप्राक्सिद्धवत्कृतमभेदंविशदयति। अनयोरिति। प्राज्ञेश्वरयोरभेदंश्रुतिप्रमाणयति। एषसर्वेश्वरइति। आदिपदादर्थएषसं
प्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरूपसंपद्यस्वेनरूपेणाभिनिष्पद्यतइतिश्रुत्यंतरग्रहः। प्राज्ञेश्वरात्मकस्यचैतन्यस्यापि

आनंदभुक्चेतोमुखः प्राज्ञइत्यादिश्रुतेः। सुखमहमस्वाप्संनकिंचिदवेदिषमित्युत्थितस्यपरामर्शोपपत्तेश्च। अनयोः
समष्टिव्यष्ट्योर्वनवृक्षयोरिवजलाशयजलयोरिववाऽभेदः। एतदुपहितयोरीश्वरप्राज्ञयोरपिवनवृक्षावच्छिन्ना
काशयोरिवजलाशयजलगतप्रतिबिंबाकाशयोरिववाऽभेदः। एषसर्वेश्वरइत्यादिश्रुतेः। वनतदवच्छिन्नाकाशयोर्ज
लाशयतद्गतप्रतिबिंबाकाशयोर्वा आधारानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतंचैतन्यंत — यदनुपहितं २
तुरीयमित्युच्यते। शिवमद्वैतंचतुर्थंमन्यंतइत्यादिश्रुतेः। इदमेवतुरीयंशुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यांत

हितत्वेऽनुपहितंचैतन्यमन्यदेवेत्यर्थादुक्तेः किंतदित्यपेक्षायांतत्स्वरूपसंज्ञेदर्शयति। वनेति। आधारश्चासावनुपहितश्चासावाकाश
श्चसतथातद्वदितियावत्। यद्यप्याकाशस्यवनाश्रयत्वंजलाशयाश्रयत्वंवानास्तितदनारंभकत्वात्तथाप्यवकाशमंतरेणता
योःस्थित्यनुपपत्तेस्तदाधारत्ववचनमितिद्रष्टव्यं। अस्यचैतन्यस्यतुरीयत्ववदामाणविश्वाद्यपेक्षयेतिद्रष्टव्यं। तत्रप्रमाणमा
ह। शिवमिति। आदिपदात्त्रिषुधामसुयद्भोग्यंभोक्ताभोगश्चयद्भवेत्। तेभ्योविलक्षणःसाक्षीचिन्मात्रोहंसदाशिवइत्यादिश्रु
त्यंतरग्रहः। अध्यारोपेणव्याख्यातचित्ततयाप्रकरणार्थविस्मरणंमाभूदितिप्रसंगात्तमाह। इदमेवेति। ॥ श्रीगणेशायनमः॥

वे॰सा॰
टी॰२०
20

एवमवस्थात्रयाभिमानिसहितमज्ञानं सविभागं सप्रपंचं च निरूप्येदानीं तत्कार्याध्यारोपं क्रमेणानिरूपयिष्यंस्तदुपयोगित्वेनाज्ञानगतं सामर्थ्यं तावन्निरूपयति। अस्येति। तत्रावरणशक्तिं सदृष्टान्तामुपपादयति। आवरणेति। यद्यप्यज्ञानस्य मूर्तत्वामूर्तत्वाभ्यामनिर्वाच्यत्वादपरिच्छिन्नत्वं तथापि परिच्छेदापेक्षयाल्पत्वमात्रं विवक्षितमिति दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं। बुद्धिपिधायकतयेत्यात्मबुद्धिशब्देन तदनुरक्तं चैतन्यं लक्ष्यते बुद्धेर्ज्ञानकार्यत्वेन तदावृतत्वानुपपत्तेः। निरूपितेर्थे हस्तामलकाचार्यसंमतिमा

मु॰ न्यायः पिंडवदविविक्तस्तन्महावाक्यस्य वाच्यो विविक्तस्सल्लक्ष्य इति मिष्यते। अस्याज्ञानस्यावरणविक्षेपनामकमस्ति शक्तिद्वयं। आवरणशक्तिस्तावत्। अल्पोऽपि मेघोऽनेकयोजनायतमादित्यमंडलमवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव तथाज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यं। तदुक्तं घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा मन्यते निःप्रभं चातिमूढः। तथा बद्धवद्भाति

त॰ यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोहमात्मा। अनयावृतस्यात्मनः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिसंभावनापि भवति। यथा स्वाज्ञानेनावृतायां रज्जौ सर्पत्वसंभावना। विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकं समुद्भावयति। एवमज्ञानमपि स्वावृतात्मनि स्वशक्त्या आकाशादिप्रपंचमुद्भावयति तादृशं सामर्थ्यं। तदुक्तं विक्षेपशक्तिर्लिंगादिब्रह्मांडांतं जगत्सृजेदिति स्मृतेः॥७॥ हा। तदुक्तमित्यादिना। उक्तामावरणशक्तिं तत्कार्यद्वारा बुद्धिमारोहयति। अनयेति। अधिष्ठानस्वरूपविशेषावरणवशेन विपरीतार्थसंभावना भवतीत्यत्र दृष्टान्तमाह। यथा स्वाज्ञानेति। विक्षेपशक्तिं सदृ

पे ष्टान्तमाह। विक्षेपेति। अत्राचार्यांतरसंमतिमाह। तदुक्तं विक्षेपेति। आवरणविक्षेपशक्तिद्वयविशिष्टमज्ञानं कूटस्थासंगाद्वयचैतन्यात्मनो जगत्कारणत्वोपाधिरिति भावः। तदुक्तमभियुक्तैः आच्छाद्य विक्षिपति संस्फुरदात्मरूपं जीवेश्वरत्वजगदाकृतिभिर्मृषैव। अज्ञानमावरणविभ्रमशक्तियोगादात्मत्वमात्रविषयाश्रयताबलेनेति॥ प

पे२

रा ८
राम २०

नन्वेवंविधाज्ञानोपाधिकस्येश्वरचैतन्यस्य यत्कारणत्वं तन्निमित्तत्वं स्यादुपादानत्वं वा उभयं वेति जिज्ञासायामाह। शक्तिद्वयव
दिति। स्वप्रधानतया कूटस्थचैतन्यस्वरूपावभासितया स्वोपाधिप्रधानतया तु उपाधिषुपरक्तसत्तास्फूर्त्तिरूपतयेति भेदः। एकस्योभया
विधकारणात्मकत्वे दृष्टांतमाह। यथेति। लूता ऊर्णनाभिः तंतुरेव कार्यं तंतुकार्यं यथा लूता तंतुनिर्माणे प्रसिद्धकार्पासतूल
काष्ठयंत्रादिसहायमनपेक्ष्यैव तंतून् तानवितानात्मकं च तत्कार्यं जालरूपं सृजति एवमीश्वरः प्राक्सृष्टेरेक एवाद्वितीयोसहाय एव
स्वमायाशक्त्यावेशमात्रेण लिंगादिब्रह्मांडांतं जगत्सृजेदिति भावः। तथा च श्रुतिः यत्तदद्रेश्यमग्राह्यमित्युपक्रम्य यथोर्णनाभिः सृजते

शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति। यथा लूता तंतुस्वकार्यं
प्रति स्वप्रधानतया निमित्तं स्वशरीरोपाधिप्रधानतयोपादानं च भवति। तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचै
तन्यादाकाशमाकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते। तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादि

गृह्णीते च यथा पृथिव्यामोषधयः संभवंति यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्वमिति। न्यायोपि प्रकृतिश्च प्रतिज्ञाह।
तेन गृह्णीते च यथा पृथिव्यामोषधयः संभवंति यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्वमिति। न्यायोपि प्रकृतिश्च प्रतिज्ञाह।
दृष्टांतानुपरोधादिति। तदेवं चैतन्यस्य जगत्कारणत्वं प्रपंच्य ततः कार्योत्पत्तिक्रमं दर्शयति। तमःप्रधानेति। तमसः प्राधान्यनिर्देशादु दा३
३२ जःसत्त्वयोरपि तत्र मायावृत्तिर्द्रष्टव्या। उक्तभूतसृष्टिक्रमे प्रमाणमाह। तस्मादिति। नन्वाकाशं नोत्पद्यते निरवयवद्रव्यत्वादात्मवदि
ति चेन्न। उदाहृतश्रुतिबाधितविषयत्वेनानुमानानुत्थानात् प्रत्यनुमानविरोधाच्च। तथाहि आकाशमुत्पद्यते महत्त्वे सति भूत
तत्त्वान्महापृथिव्यादिवत्। न चाश्रयासिद्धो हेतुः। आश्रयस्याकाशस्योभयवादिसिद्धत्वात्। न च धर्मिग्राहकप्रमाणबाधनिबंधना पाश्रयासिद्धो हेतोः। धर्मिग्राहकप्र

माणेन शब्दाश्रयत्वेनाकाशस्य धर्मिमात्रसिद्धावपि तदुक्तनित्यत्वादेस्तेनासिद्धेः। न च स्वरूपासिद्धः। भूतत्वमहत्त्वयोः पक्षे संप्रति
पत्तेः। न च व्याप्यत्वासिद्धः। निरुपाधिकत्वात्। न च मूर्त्तत्वसावयवत्वरूपवत्त्वादेरुपाधित्वं शंक्यं गुणकर्मणोः साध्याव्याप्तेः। भूता
त्वद्रव्यत्वसामान्यवत्त्वादेश्च साधनव्यापकत्वात्। अपि द्रव्यत्वव्यतिरिक्तावांतरजातिमत्त्वमुपाधिरिति चेन्न प्रध्वंसे साध्याप्तेः। ता व्या ३
स्योत्पत्तिमत्त्वेपि जात्याश्रयत्वाभावात्। न च साध्यस्योत्पत्तिमत्त्वस्य भावधर्मिकत्वान्न प्रध्वंसे प्रसक्तिरिति वाच्यं। उत्पत्तिमात्रस्ये
वाकाशे साध्यत्वात्। अन्यथा विप्रतिपत्तिविषयाणां द्रव्यत्वादीनां धर्मिगतानां साध्यताप्रसंग इत्यनुमानाकौशलमापद्येत। न चा
न्यः कश्चिदुपाधिरुत्प्रेक्ष्यते। अविभुत्वं त्वाकाशेपि वेदांतिनः समानं। ज्यायानंतरिक्षात्। येनावृतं खं च दिवमित्यादावात्मा
पेक्षयाकाशस्य न्यूनपरिमाणत्वश्रवणात्। अतो न तं प्रति तस्योपाधित्वं। नापि विरुद्धः साध्यविपर्ययाव्याप्तेः। नापि साधारणा
नैकांतिकः विपक्षाप्रवेशात्। नाप्यसाधारणः सपक्षगामित्वात्। नापि कालातीतः। बाधकप्रमाणानिरूपणात्। न चोक्तानुमानं
बाधकमिति वाच्यं। तस्य नरशिरःकपालशुचित्वानुमानवदागमबाधितविषयत्वस्योक्तत्वात्। न च श्रुतेराकाशाभिव्यक्तिमात्रार्थत्वा
तै ६ न्नोत्पत्त्यर्थत्वमिति वाच्यं। सिद्धे चानुमानस्याबाधितविषयत्वेन प्रामाण्ये श्रुतेरन्यार्थत्वसिद्धिस्तत्सिद्धावितरसिद्धिरितीतरेतराश्र
यात्। किंच तस्माद्वा एतस्मादात्मन आकाशः संभूत इति सकृच्छ्रुतः संभूतशब्द आकाशे साक्षात्तं वक्ष्यमाणेनो गौणः सर्ववाय्वा
मु ४ दावनुषज्यमानो मुख्य इति महदिदं व्याख्यानकौशलं तार्किकशिरोमणेः। नापि संदिग्धानैकांतिकता। विपक्षव्यावृत्तेः स्फुटत्वात्॥
नापि प्रकरणसमानता। त्वदनुमानस्य दुर्बलत्वेनोभयोः समानबलत्वाभावात्। निरवयवद्रव्यत्वस्य विनश्यदवस्थापन्ने
पटे व्यभिचारादवयवत्वात्यंताभावाधिकरणत्वं निरवयवशब्देन विवक्षितमिति चेन्न। अवयवशब्देन प्रदेशविवक्षायां स
र्वस्याप्यवयविप्रदेशस्यावयवत्वेनोपक्षीणत्वादवयवाभावप्रसंगात्। आश्रयविवक्षायामन्यतरासिद्धो हेतुः स्यात्। राम

आकाशाश्रयस्य ब्रह्मणोमयेशृत्वात्। तस्मात्त्वदनुमानेन प्रतिपन्नः। नापि प्रतिपन्नान्तरमुत्प्रेक्ष्यते। तस्मादनुमानेनाप्याका
शोत्पत्तेः संभावितत्वात्। श्रुत्युक्ततर्कश्च ज्ञामना हृत्य श्रुत्युक्तमेवाकाशजन्मेतरजन्मवच्छेद्यं। अभ्युपगम्य चेदं परमाणूनामनु
त्पत्तिमत्त्वमहत्त्वे सतीति हेतुर्विशेषितः तदनभ्युपगमे तु भूतत्वादित्येव हेतुः। तथा हि चतुर्विधाः परमाणवः उत्पद्यन्ते मूर्त्ता
त्वाद्भूतत्वाद्वा घटादिवत्। न च मनसि मूर्त्तत्वहेतोरनैकान्तिकता। तस्यापि पक्षतुल्यत्वात्। न च धर्मिग्राहकप्रमाणबाधः। सिद्धेपि
तेन धर्मिस्वरूपे तद्गतनित्यत्वादेरसिद्धेः। न च परमाणूनामपि कार्यत्वे कारणानवस्था नान्यत्किमपि मूलकारणं जगतः स्यादि
तिवाच्यं। ब्रह्मण एव जगन्मूलकारणस्य श्रुतिस्मृतीतिहासपुराणप्रसिद्धत्वात्। तथा दिक्कालावुत्पत्तिमन्तौ अचेतनभावत्वे
त्पटवत्। न चास्माकमविद्यायां व्यभिचारस्तस्या भावाभावविलक्षणत्वाभ्युपगमात्। अन्येपि हेत्वाभासाः पूर्ववदुद्धरणीयाः। न
च सामान्यविशेषसमवायेषु व्यभिचारः। तत्र सामान्यस्य विचार्यमाणे ब्रह्मस्वरूपानतिरेकात्। अचेतनत्वहेतोस्तत्राप्रवृ
त्तेः। तथा हि विशेषास्तावत्सामान्ये कल्पिता इति त्वविद्यावादे निरूपितं। तथा च द्रव्यत्वादीनां सामान्यविशेषाणां सामान्यमात्ररू
पायां सत्तायामन्तर्भावः सत्तायाश्चापि स्फुरणविरहितायाः क्वाप्यनुपलंभात्स्फुरणमात्रत्वं युक्तं स्फुरणं च ब्रह्मैव सदेव सोम्येदं स
त४ त्यं ज्ञानमनंतमित्यादिश्रुतेः। ब्रह्म तं परादाद्योन्यत्रात्मनो ब्रह्म वेदेत्यादौ परब्रह्मस्वरूपातिरिक्तत्वेन ब्राह्मण्यादिजातिं विजा
नतो निंदाश्रवणाच्च। तस्मान्न सामान्ये व्यभिचारः। विशेषसमवायो तु खपुष्पकल्पौ। अनयोर्यथा खपुष्पकल्पत्वं तथा चिदानंद पु२
लहरीटीकायां प्रपंचितमस्माभिरिती होपरम्यते। श्रुतयश्च भवंति प्रत्यनुमानबाधिकाः अणोरणीयानिति हि परमाणोरप्यणीयः
परमकारणं ब्रह्म दर्शयित्वा यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोस्ति कश्चिदिति तैत्तिरीयश्रुतिस्तद्व्यतिरिक्तमणुमा

वे॰सा॰
टी॰२२
हृच्चाविशेषेण प्रतिषेधति। असतोधिमनोसृजत। तस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति तैत्तिरीयाथर्वणश्रुती मनसउत्पत्तिं स्पा
ष्टमाचक्षाते तथाज्ञः कालकालो गुणी सर्वविद्यः सर्वे निमेषाजज्ञिरे इति चश्वेताश्वतरतैत्तिरीयश्रुती कालस्यापि कार्यतामावेदयतः पु
रुष एवेदं सर्वमित्युपक्रम्य दिशः श्रोत्रादिति पुरुषसूक्तयात्मिका श्रुतिः दिशां पुरुषविकारत्वं सूचयति। वस्तुतस्तु प्राच्यादिव्यपदे
शस्यादित्यगत्युपाधिनानभस्येव कल्पितत्वान्नाकाशातिरिक्तादिगस्तीति गमयितव्यं। न च ब्रह्मण्युत्पद्यते कारणत्वादाकाशवदि
ति ५ तिवाच्यं। अजो नित्य इत्यादिश्रुतिविरोधात्। असंभवस्तु सतोनुपपत्तेरिति न्यायविरोधाच्च। एतेन जगत उत्पत्तिप्राक्काले ब्रह्मातिरि
क्तं वस्तु नास्तीति दर्शितं। अविद्यायाश्चात्मशक्तित्वेन ततः पार्थग्ग्यो योगाज्जीवानां च तदा परमात्मनि संपन्नत्वात्तद्दृष्टानां च तत
दुपाध्यन्तःकरणनिष्ठानां तत्संस्कारविशेषाणां विद्यामात्रत्वेन पृथक्सत्त्वाभावात्। विस्तृतं चैतदाचार्यैर्वियदधिकरणादावि
ति विश्रम्यते। आकाशाद्वायुर्वायोरग्निरित्यादौ आकाशादिभावमापन्नाद्विद्यासहायाद्ब्रह्मण एव वाय्वादीनामुत्पत्ति
रिति द्रष्टव्यं। तत्तेजोऽसृजत तत्तेज ऐक्षतेत्यादिश्रुत्यंतरे तेजःप्रभृतेरपीक्षणपूर्वकमवादि सर्वेश्वरत्वश्रवणात्। अचेतनस्य
चेक्षणानुपपत्तेः। न्यायोपि तदभिध्यानादेव तल्लिंगात्सइतीममेवार्थं निर्णयति। एतेन प्रधानाद्यवादिवादा निरस्ता
वेदितव्याः तेषां श्रुतिविरुद्धत्वान्न्यायविरुद्धत्वाच्च। न ह्यचेतनं चेतनानधिष्ठितं किंचित्कुर्वदुपपद्यते। रथशकटा
दावदर्शनात्। अतो न प्रधानवाद आश्रयणीयः। तथा परमाणुवादोपि। अणवो [illegible] र्द्वयोः संस्याव्याप्यवृत्तित्वे ता योगा ४
योः सावयवतापत्तेरनित्यत्वप्रसंगः। तत्संयोगस्य व्याप्यवृत्तित्वे निरवयवयोरण्वोरेकस्मिन्नितरस्य संमितत्वात्प्रथिमानुप
पत्तिः। तथा च तत्कार्यस्य द्व्यणुकस्यापि पारिमंडल्यत्वप्रसंगः। किंच द्व्यणुकारंभसमये परमाणूनां कथंचिद्द्विक्रियेतेन वा। आद्येऽ
नित्यत्वादिदोषापत्तिर्मृत्पिंडादिवत्। द्वितीये परमाणुसमूहएव द्व्यणुकादिकार्यस्यात्तृणपूलवदित्यलं प्रपंचेन प्रकृत राम
२२

मनुसराम:। तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यमाकाशादिकारणमित्युक्तं तत्कथमवगम्यते भूतकारणाज्ञाने तमः।
प्राधान्यमिति तत्राह। तेषु चेति। जाड्याधिक्यदर्शनादित्यत्राधिकशब्दः प्रयुञ्जानः सत्तास्फूर्तिप्रदत्वेन कार्येषु चैतन्यस्यापीषदनु।
वृत्तिं सूचयति। तथा चाहुस्तत्त्वदर्शिनः अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकं। आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयमिति। विशिष्टा
प्याह यदस्ति यद्भाति तदात्मरूपं नान्यत्ततो भाति न चान्यदस्ति स्वभावसंवित्प्रतिभाति केवला ग्राह्यं ग्रहीतेति मृषाविकल्पइति
।उत्पद्यमानेष्वाकाशादिषु वक्ष्यमाणकार्यानुरूपं गुणत्रयमुपलंभयति। तदानीमिति। कारणस्याव्याकृतस्य ये गुणाः सत्त्वादय।

तेषु चाकाशादिषु जाड्याधिक्यदर्शनात्तमःप्राधान्यं तत्कारणस्य। तदानीं सत्त्वरजस्तमांसि कारणगुणक्रमेण तेष्वाका
शादिषूत्पद्यन्ते। एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते। एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्प
द्यन्ते। सूक्ष्मशरीराण्यपि सप्तदशावयवकानि लिङ्गशरीराणि॥

तेषां प्रक्रमेण तान्गुणानारभ्य यथाकार्यं क्रमं सत्त्वादिगुणाः स्वे
व कार्येष्वेवोत्पद्यन्त इत्यर्थः। नन्वव्याकृतात्त्वं च तन्मात्राणि क्रमेण जायन्त इति हि स्मृतीतिहासपुराणेषु प्रसिद्धिस्तत्कथमाकाशादिरि
होत्पत्तिराम्नायत इति तत्राह। एतान्येवेति। एतान्येवाकाशादीनि सूक्ष्मभूतानि व्यवहाराक्षमाणि शब्दादितावन्मात्रैकस्वभावानि।
अपञ्चीकृतानि परस्परमसंसृष्टानि चेति स्मृत्यादिषूच्यन्ते महर्षिभिरित्यर्थः। तदेवंभूताध्यारोपं श्रौतमुपक्रम्येदानीं भौतिकाध्यारो।
तेर पं प्रतिजानीते। एभ्य इति। प्रतिज्ञातैकदेशं विवृणोति। सूक्ष्मशरीराणीति। लिङ्ग्यते ज्ञाप्यते प्रत्यगात्मसद्भाव एभिरिति लिङ्गानि तानि
च तानि शरीराणि च शरीरे प्रविष्टत्वाच्छरीरसाधनत्वाद्वा धर्मादिद्वारेणेति लिङ्गशरीराणीत्यर्थः। तथा च प्रयोगो विमतानीन्द्रि

वे०सा० टी०२३ याणि प्राणश्च स्वातिरिक्तस्वानुगतचैतन्याधिष्ठानपूर्वकप्रवृत्तयो चेतनत्वाद्रथादिवदिति। श्रुतिश्च भवति प्राणस्य प्राणमुत चक्षुष

श्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुरिति यो वेदेदं जिघ्राणीति स आत्मा गंधाय घ्राणमित्यादिका च। के पुनः सप्तदशावयवा इति तान्

हा। अवयवास्त्विति। ननु कथं लिंगशरीरं सप्तदशावयवमिति निर्धार्यते यावता पुर्यष्टकं लिंगमाचक्षते सुरेश्वराचार्याः पंचीकरणवार्त्ति

23 लिं४ के ज्ञानेंद्रियपूगं चैव पंचकर्मेंद्रियाणि च। मनो बुद्धिरहंकारश्चित्तं चेति चतुष्टयं। प्राणोपानस्तथा व्यान उदानाख्यस्तथैव च। समानश्चेति

पंचैताः कीर्त्तिताः प्राणवृत्तयः। खंवायुरग्निरब्धरित्र्यश्च भूतसूक्ष्माणि पंच च। अविद्याकामकर्माणि लिंगं पुर्यष्टकं विदुरिति। अन्यत्रा

अवयवास्तु ज्ञानेंद्रियपंचकं बुद्धिमनसी कर्मेंद्रियपंचकं वायुपंचकं चेति।

पुनरन्यादृशं वर्णितं भूतसूक्ष्मपंचकं एकं कर्मज्ञानेंद्रियपंचकद्वयं चतुर्वृत्तिकमेकमंतःकरणं पंचवृत्तिक एकः प्राणश्चेति सप्तदशावयवा

इति अतः कथं निर्णय इत्युच्यते। न चैतेषां पक्षाणां विकल्पोभ्युपेयते। वस्तुनि तदयोगात्। नापि समुच्चयः। तत्र प्रमाणाभावात्।

किंत्विहोक्तस्य सप्तदशकस्यैव संक्षेपविस्तरभेदेन तथा तथा तत्र तत्र कथनं। तथाहि। इहोक्तानां हि सप्तदशानामव

यवानां भूतसूक्ष्माण्युपादानानि। तदुपादानं चाविद्या। अतश्चोपादानोपादेययोरभेदाच्चाविद्याभूतसूक्ष्मेभ्यः पृथग्विव

क्ष्यते भूतसूक्ष्माणि च लिंगशरीरेभ्योनपथ्यगभिप्रेयंते कामकर्मणोरप्यंतःकरणवृत्तित्वेन तदाश्रितत्वेन च तदभेदा राम

न्न पार्थग्ध्यविवक्षा। अतः पुर्यष्टकवार्त्तिकेन न विरोधः। तथापि पक्षांतरेपि भूतसूक्ष्माणि तत्कार्येभ्यः पृथक्कृत्यांतःकरणप्रा २३

एयोऽस्य वृत्तिवृत्तिमतोरभेदं गृहीत्वा सप्तदशत्वं निरूपितं। तथा च सप्तदशप्रजापतिरिति श्रुतेः प्रजापतेर्हिरण्यगर्भस्य सप्तद
शत्वावगमात्सप्तदशावयवमेव लिंगशरीरं मुख्यं ज्ञेयमिति। तदुक्तमभियुक्तैः मुख्यं तु सप्तदशकं प्रथितं तद्धि लिंगमिति। ज्ञानसाधना
नीन्द्रियाणि ज्ञानेन्द्रियाणि श्रोत्रादीनि तेषां शब्दस्पर्शरूपरसगंधग्राहकेन्द्रियत्वानि प्रत्येकं यथाक्रमं लक्षणानि। इन्द्रिया
ण्याहंकारिकाणीति सांख्यास्तान्निराकुर्वंस्तेषां भौतिकत्वं कथयति। एतानीति। कारणगुणो नात्यन्नत्रिगुणानां भूता
नां सत्त्वगुणावच्छिन्नेभ्योंऽशेभ्यो गुणोद्रेककृतभागेभ्यः श्रोत्रादीनि जातानीत्यर्थः। बुद्धिमनसी लक्षयति। बुद्धिर्नामेति। नि
श्चयोऽध्यवसायः इदमित्थमेवेति विषयपरिच्छेदः संकल्पः इदं नीलमिदं पीतमिति विषयविवेचनं विकल्पस्तद्विपर्यय इति

ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि। एतानि पुनराकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक्क्रमेणोत्पद्यन्ते।
बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः। मनो नाम संकल्पविकल्पात्मकान्तःकरणवृत्तिः। अनयोरेव चित्ताहंकारयोरं
तर्भावः। एते पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यन्ते।)) भेदः। नन्वन्तःकरणस्य चतुष्टयत्वप्रसिद्धेः कथमिदं

द्वयमेव गृहीतमित्यत आह। अनयोरेवेति। अनुसंधानात्मिकान्तःकरणवृत्तिश्चित्तं। अभिमानात्मिकान्तःकरणवृत्तिरहंकारः। चित्त
स्य बुद्धावन्तर्भावः विषयपरिच्छित्तिरूपत्वाविशेषात्। अहंकारस्य मनस्यन्तर्भावस्तस्यापि संकल्पात्मत्वाविशेषात्। एवं स्वरूपा
भेदेऽपि विषयभेदात्क्वचिच्चित्ताहंकारयोर्बुद्धिमनोभ्यां पृथङ्निर्देशः। बुद्धेर्ह्यपूर्वो विषयश्चित्तस्य पूर्वानुभूतस्तथा मनसो वा
ह्यस्तथाभ्यंतरश्च सर्वो विषयो यथायोगं अहंकारस्य त्वनात्मोपरक्त आत्मैवेति। अतो विषयभेदेऽपि स्वरूपाभेदाद्युक्तोऽन्तर्भावः
। पूर्ववदेषां चतुर्णामप्यन्तःकरणभेदानां भौतिकत्वमाह। एते पुनरिति।

क३

उक्तानां ज्ञानेन्द्रियाणामन्तःकरणानां च भूतगतसात्त्विकांशकार्यत्वे हेतुमाह। एतेषामिति। तत्र सत्त्वं निर्मलत्वात्प्रकाशक
मनामयमितिस्मृतेः सत्त्वकार्यभूतः प्रकाशः इन्द्रियान्तःकरणेषूपलभ्यमानस्तेषां सत्त्वकार्यतां गमयतीत्यर्थः। निरूप्यमाणे
लिंगशरीरे उक्तैरवयवैः सिद्धमवांतरभेदं कथयति। इयं बुद्धिरिति। बुद्धिग्रहणेनार्थान्मनो व्यावृत्तिरभिप्रेता। तदुपहित
चैतन्यस्य च व्यपदेशभेदमाह। अयमिति। अयं विज्ञानमयकोशावच्छिन्नश्चिदात्मा जीव इत्युच्यत इत्यन्वयः। तस्य प्रा
ज्ञात्मनो विशेषमाह। व्यावहारिक इति। व्यावहारिकमेव विशेषणान्तरेण व्यनक्ति। इहलोकेति। तत्र हेतुमाह। कर्तृत्वे

एतेषां प्रकाशात्मकत्वात्सात्त्विकांशकार्यत्वं। इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता सती विज्ञानमयकोशो भवति। अयं कर्तृ
त्वभोक्तृत्वाद्यभिमानेनेहलोकपरलोकगामी व्यावहारिकजीव इत्युच्यते। मनस्तु कर्मेन्द्रियैः सहितं सन्मनोमयको
शो भवति। कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि। एतानि पुनराकाशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक्पृ०
थक्क्रमेणोत्पद्यंते।

ति। तथा च श्रुतिः विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि चेति। कर्तृत्वादिकं चैतन्यात्मनो न वास्त
वं किंत्वाभिमानिकमित्यभिप्रेत्याभिमानेनेत्युक्तं। तथा च श्रुतिः स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायती
वेत्याद्याः इवशब्देन व्यवहारस्याभासतां दर्शयति। तथा न्यायो च कर्ता शास्त्रार्थवत्त्वात् यथा च तक्षोभयथेति च कर्तृत्वा
कर्तृत्वयोर्व्यावहारिकपारमार्थिकत्वे व्यवस्थापयतः। पूर्ववन्मनः संवद्धमवांतरभेदमाह। मनस्त्विति। कर्मसाधना
नीन्द्रियाणि कर्मेन्द्रियाणि तानि विभजते। कर्मेन्द्रियाणीति। वचनादानगमनविसर्गानंदसाधनेन्द्रियत्वं यथाक्रमं वा राम
गादीनां प्रत्येकं लक्षणं। एतेषामपि पूर्ववद्भौतिकत्वमाह। एतानीति। ॥राम राम राम राम ॐ श्री रामाय नमः। हरे हरे॥ २८

ननु कथमिन्द्रियाणां भौतिकत्वं निर्दिश्यते यतस्तेषां भूतयोनेः परमकारणादेवोत्पत्तिः श्रूयते एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि
चेति। सत्यं श्रूयते तत्रार्थक्रमेणैवाश्रित्य भूतभावमापन्नात्तस्माद्भूतयोनेरिन्द्रियोत्पत्तिराश्रिता। तथा च न्यायः अन्तरा विज्ञानम
नसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषादिति। न च तेषां भौतिकत्वे प्रमाणाभावः। अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी
मा वागिति श्रौतलिङ्गसंप्रत्ययात्सत्त्वात्। न च वागादिष्विन्द्रियत्वमप्रसिद्धमिति वाच्यं। प्रज्ञया वाचं समारुह्य वाचा हि सर्वाणि नामा
न्याप्नोतीति कौशीतकिवाक्ये चक्षुरादिभिः सह वाचः समभिव्याहृतत्वात्। आथर्वणे च चक्षुश्च द्रष्टव्यं चेत्यादिना सविष
याणीन्द्रियाण्यनुक्रम्य हस्तौ चादातव्यं चोपस्थश्चानन्दयितव्यं च पायुश्च विसर्जयितव्यं च पादौ च गन्तव्यं चेति हस्तादी
नामपि सविषयाणां समभिव्याहृतत्वात्। एतानि चेन्द्रियाण्येकादशैव भवन्ति न न्यूनानि नाधिकानि। दशेमे पुरुषे प्रा
णा आत्मैकादश इति श्रुत्यनुरोधेनेति ज्ञातितत्वात्। अत्रात्मशब्दो मनोविषयः प्राणशब्द इतरेन्द्रियविषय इति भेदः
। अणुत्वं चैषां परिच्छिन्नत्वे सति सूक्ष्मत्वलक्षणमभ्युपगन्तव्यं। न तु परमाणुलक्षणत्वं। तथा सति सर्वशरीरव्यापिका
र्यानुपपत्तिप्रसंगात्। अपरिच्छिन्नत्वे चोत्क्रान्तिगत्यागतिश्रुतिव्याकोपप्रसंगः। स्थूलत्वे चोत्क्रान्तिसमये बिलान्निर्गच्छति
इव सर्पः शरीरच्छिद्रेभ्यो निष्क्रममाणानीन्द्रियाणि प्रत्यक्षेणोपलभ्येरन्। न चोपलभ्यन्ते तस्मादुक्तप्रकारेणाणूनीन्द्रिया
णि। नन्वग्निर्वाग्भूत्वा मुखं प्राविशदित्यादिश्रुतेरग्न्यादिदेवतानामेव मुखादिस्थानेषु वागादीन्द्रियात्मना प्रवेशश्रवणा
त्कथमेषां भौतिकत्वमुच्यत इति चेन्नैष दोषः देवतानामप्याधिदैविकप्राणात्मनां भौतिकदेहविशिष्टचेतनानामेवैश्वर्य
योगादध्यात्मवागादिरूपेण मुखादिष्ववस्थानस्येष्टत्वात्। तथा च भौतिकान्यपीन्द्रियाणि देवताशरीराणि चेति न विरुध्य।
तेऽयं हीन्द्रियाणामुक्तलक्षणानि भौतिकान्येव देवतानां पुनस्तदधिष्ठातृत्वेन तच्छरीरतया तत्र प्रवेशए वाग्निर्वा।

वे॰सा॰ टी॰२५ भूत्वा इत्यादावाम्नायत इति। तथा चान्यो ज्योतिराद्याधिष्ठानं तु तदामननादिति। लिंगं च स एतास्तेजोमात्राः समभ्याददानो
हृदयमेवान्ववक्रामतीति तेजोमात्राणामिंद्रियाणां मुक्तानि मय्ये हृदयप्रवेशोक्त्या भयश्चैष चाक्षुषः पुरुषः पराङ् पर्यावर्त्ततेथारू(मु२
पज्ञो भवतीत्यादित्यपुरुषस्य चक्षुषोपक्रमणं दर्शयति। ये पुनर्मुख्यप्राणस्य वृत्तिभेदा वागादय इति वदंति तेप्यनयैव नीत्या(
25 निराकरणीयाः। ते ह वाचमूचुस्त्वं न उद्गायेत्युपक्रम्यासुरपाप्मविद्धत्वेन वागादीननुज्ञात् निर्धार्य समाप्य च वागादिप्रकरणम(
मथा हेममासन्यं प्राणमूचुरिति पृथगेव मुख्यप्राणस्य निर्देशात्। तथा सुषुप्तावपि वागादीनामुपसंहारे मुख्यप्राणस्य सवृत्ति
कस्यास्ति जागरणमिति वैषम्यलिंगाच्च प्राणादिंद्रियाणां भेदः। एवमादिन्यायकलापो द्वितीयेध्याये चतुर्थे पादे विस्तृतः इहतु
नवेदांतसारत्वाद्ग्रंथस्य वेदांतविहितान्यायालेशतो दर्शिता इति। तस्माद्युक्तमिंद्रियाणां भौतिकत्वादीति स्थितं। इदानीं वायुपंच

वायवः प्राणापानव्यानोदानसमानाः। प्राणो नाम प्राग्गमनवान्नासाग्रस्थानवर्त्ती। अपानो नामाधोगम
नवान्पाय्वादिस्थानवर्त्ती। व्यानो नाम विष्वग्गमनवानखिलशरीरवर्त्ती॥

कं विभजते। वायव इति। प्राग्गमनमग्रतो
निःसरणं। यद्यपि प्राणो हृदय इति श्रुतेर्हृदि प्राण इत्यभिधानाच्च हृदयस्थानः प्राणस्तथापि नासाग्रे प्रत्यक्षमुपलभ्यमानत्वान्ना
साग्रस्थानवर्त्तीत्युक्तं। अधो नाभेरधस्तात् गमनवान् मलापनयनव्यापारेण पायुर्गुदस्तत्स्थानवर्त्तीत्यर्थः। आदिशब्दादुपस्थ(
ग्रहः तत्रापि मूत्ररेतोविसर्गस्यापानकर्मत्वात्। विष्वक्परितः सर्वतो गमनं विद्यते यस्य तथा। प्राणापानयोर्नियमनकर्मारण्या
मग्न्युत्पादनादि वीर्यवत्कर्मतयोर्हेतुत्वादखिलशरीरवर्त्तीत्या न इत्यर्थः। तथा च श्रुतिः अथ यः प्राणापानयोः संधिः स
व्यान इत्युपक्रम्य यथाग्नेर्मंथनमाजेः सरणं दृढस्य धनुषः आयमनमप्राणन्ननपानं स्तानि करोतीति इति॥ श्रीगणेशप्रा॰ राम

यद्यपि चक्षुष्टो वा मूर्द्ध्नो वान्येभ्यो वा शरीरेभ्य इति श्रुतेरुत्क्रमणस्य चक्षुरादिद्वारेष्वनियमस्तथापि कंठसंबंधस्य
प्रायेणनियतत्वात्कंठस्थानवर्त्ती उदान इत्युक्तं। अशनादेः समनयनात्समान इत्यर्थः। मतांतरमुत्थापयति स्वमतपरि
ल ३ शुद्धये। केचिदिति। तेषां लक्षणमाह। नाग इत्यादिना। उद्गिरणं छर्दिः। उन्मीलनशब्दो निमीलनस्याप्युपलक्षणपरः। पोषणं
पुष्टिः। अत्यंतप्रसिद्धेः। उत्थापितमतं प्रत्याचष्टे। एतेषामिति। केचित्तुशब्दश्चौपनिषदविषयः। एतेषां नागादीनां प्राणादिष्वंत
भावादित्यस्यायमर्थः। उद्गिरणं ह्यूर्द्ध्वमुखस्य वायोः क्रिया। ऊर्द्ध्वमुखश्च वायुरुदान इत्युक्तं। तथा चोदाने नैवोद्गिरणस्यापि सिद्धे गा ४
त ६ नागस्य तत्कर्तुरुदानेंतर्भावान्न ततः पृथक्त्वं। उन्मीलनस्यांगचेष्टांतर्गतत्वात्तस्याश्च व्याननिमित्तकत्वादुन्मीलनकर्तुः कूर्

उदानो नाम कंठस्थानीय ऊर्द्ध्वगमनवानुत्क्रमणवायुः समानो नाम शरीरमध्यगोऽशितपीतान्नपानादिसमीकरः केचित्तु
नागकूर्मकृकलदेवदत्तधनंजयाख्याः पंचान्ये वायवः संतीति वदंति। नाग उद्गिरणकरः कूर्म उन्मीलनकरः कृकलः क्षुत्करः
देवदत्तो जृंभणकरः धनंजयः पोषणकरः। एतेषां प्राणादिष्वंतर्भावात्प्राणादयः पंचैवेति केचित्॥

मस्य व्यानेंतर्भावः। स
माने नाशितपीतादीनां पाकेनासादिभावमापद्य सकलशरीरदेशेषु तत्प्रवेशने कृते सत्येव क्षुधोत्पत्तेस्तत्कर्तुः कृकलस्य स
मानेंतर्भावः। जृंभणस्य निद्रालस्यादिहेतुकत्वान्निद्रालस्यादेश्च वातुलाद्यन्नोपजीवननिमित्तकत्वादन्नस्वीकरणस्य चापा
नकर्मत्वादपानस्यैव परंपरया जृंभणहेतोर्देवदत्तस्यांतर्भावः। अपानस्य स्यांतर्मुखतया शरीरांतः प्रवेशतो वायोरन्न
स्वीकरणहेतुत्वमैतरेयके समाम्नायते। तदपानेनाजिघृक्षत्तदावयदिति रसलोहितमांसादिक्रमेण शरीरेऽन्नपरिणामे
सत्येव पोषणापरपर्यायायाः पुष्टेः संभवात्तद्रसादिनयनकर्त्तरि समाने धनंजयस्यांतर्भाव इति। तथा च प्राणादीनामे

घा॰१

वे॰सा॰
टी॰२६

26

कल्पनेतैं गौरवमप्रामाणिकमितिभावः। श्रुतौ च पंचानामेव प्राणादीनां तत्र तत्र श्रवणान्न विरुद्धा चेयं कल्पना। प्राणादयोऽपि मुख्यस्यैकस्य प्राणस्य वृत्तिविशेषा एव न तत्त्वांतरभूताः। प्राणोऽपानो व्यान उदानः समानो न इति च बृहदारण्यके वृत्तिमतः प्राणस्य निरुपसर्गेन शब्दवाच्यस्य पंचवृत्तित्वोपदेशात्। तथा च न्यायः पंचवृत्तिर्मनोवद्व्यपदिश्यत इति। तथा मुख्यः प्राणोऽपि वायोर्वाह्यस्य सूत्रात्मरूपस्य विकारो न शरीरमध्ये नभोवद्वृत्तिलाभमात्रेणावस्थितः बाह्यवायुरेव। नापि वागादीनां सामान्यवृत्तिरूपा वा क्रिया। एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च खं वायुरिति श्रुतौ वायोरिंद्रियाणां च प्राणात्पृथगेव निर्दिष्टत्वात्।

एतत्प्राणादिपंचकमाकाशादिगतरजोंशेभ्यो मिलितेभ्य उत्पद्यते। इदं प्राणादिपंचकं कर्मेंद्रियैः सहितं सत्प्राणमयः कोशो भवति। अस्य क्रियात्मकत्वेन रजोंशकार्यत्वं। एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः मनोमय इच्छाशक्तिमान्करणरूपः प्राणमयः कोशः क्रियाशक्तिमान्कार्यरूपः योग्यत्वादेवमेतेषां विभागमिति वर्णयंति।

तथा च न्यायः न वायुक्रिये पृथगुपदेशादिति। अणुश्चेत्यादिन्यायवशादिंद्रियवत्सूक्ष्मत्वादिकमपि प्राणस्यानुसंधेयमिति संग्रहः। प्राणादीनामपि पूर्ववदुपादानविशेषं संकीर्तयति। एतदिति। उक्तानामेव कर्मेंद्रियाणां प्राणादिभिर्मिलितानां पूर्ववदवांतरविशेषमाह। इदमिति। प्राणादिपंचकस्य रजोंशकार्यत्वे लिंगमाह। अस्येति। उक्तं कोशत्रयमनूद्य तेषां प्रतिनियतां व्यवस्थां दर्शयति। एतेषु कोशेष्वित्यादिना। योऽयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष इति श्रुतेर्विज्ञानस्य चैतन्यप्रत्यासन्निहितत्वात् ज्ञानशक्तिमत्त्वं कामः संकल्पो विचिकित्सेत्यादिश्रुतेः कामापरपर्यायाया इच्छाया मनोवृत्तित्वावधारणादिच्छा

राम
२६

नोमयकोशस्य।सयथाप्रयोग्यआचरणेयुक्तएवमेवायमस्मिञ्छरीरेप्राणोयुक्तः।कस्मिन्नुत्क्रान्तेत्वहमुत्क्रान्तोभविष्यामिक।
स्मिन्वाप्रतिष्ठितेप्रतिष्ठास्यामीतिसप्राणमसृजतेत्यादिश्रुतेःप्राणमयकोशस्यक्रियाशक्तिमत्त्वं।योग्यत्वादित्यस्यायमर्थः।वि
ज्ञानमयस्यतुकर्तृत्वमुपपादितं।मनोमयस्यकरणत्वंविवेकसाधनत्वात्।आत्मेन्द्रियविषयाणांसन्निकर्षेविद्यमानेपियद
न्वयव्यतिरेकाभ्यांज्ञानभावाभावौतन्मनोविवेकसाधनत्वात्करणपद्यपातीतियुक्तंमनोमयस्यकरणरूपत्वं।तथाचश्रु।
तिरन्यत्रमनाअभूवंनादर्शमन्यत्रमनाअभूवंनाश्रौषमितितस्मादपिएषतउपस्पृष्टोमनसाविजानातीतिचान्यथात्रभ
वतिनित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमोवान्यथेति।तथातौमिथुनंसमैतांततःप्राणोजायतेतिश्रुतेःप्राणस्यवाङ्म।

एतत्कोशत्रयंमिलितंसत्सूक्ष्मशरीरमित्युच्यते।अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतयावनवज्जलाशयवद्वा
समष्टिरनेकबुद्धिविषयतयावृक्षवज्जलवद्वाव्यष्टिरितिचभवति।एतत्समष्ट्युपहितंचैतन्यंसूत्रात्माहिरण्यग
र्भःप्राणइतिचोच्यते।सर्वत्रानुस्यूतत्वाज्ज्ञानक्रियाशक्तिमदुपहितत्वाच्च।(७)

नसोर्मिथुनीभूतयोरुत्पत्तिश्रवणात्प्राणम।
यस्यकार्यरूपत्वंयुक्तमिति।एवंसूक्ष्मशरीरस्यावयवान्सविशेषान्निरूप्यावयविनंनिर्दिशति।एतत्कोशेति।लिंगंमनोयत्रनिष।
वा ४ क्तमस्यअनंतंवैमनोऽनंताविश्वेदेवाइत्यादिश्रुतिषुलिंगशरीरस्याप्येकत्ववहुत्वश्रवणात्तदेकत्वानेकत्वयोरप्यज्ञानवदेवव्य
वस्थेत्यभिप्रेत्याह।अत्रापीति।अनयोस्तुव्यष्टिसमष्ट्योरेकत्वंस्पष्टमेवपठ्यतेवायुरेवव्यष्टिर्वायुःसमष्टिरितिवृहदारण्यके।समष्टि
लिंगशरीराभिमानिनश्चैतन्यस्यव्यवहारसिद्धान्व्यपदेशविशेषानाह।एतत्समष्टीति।व्यपदेशत्रयेनिमित्तमाह।सर्वत्रेत्या
दिना।सर्वत्रानुस्यूतत्वात्सूत्रात्माज्ञानशक्तिमदंतःकरणोपहितत्वाद्धिरण्यगर्भःक्रियाशक्तिमदधिदैवतप्राणरूपत्वा।

सूत्राणः ताद्दृगध्यात्मरूपत्वाद्वायद्वात्तानक्रियाशक्तिमत्समष्टिप्राणेंद्रियसमुदायात्मकं समष्टिलिंगशरीरं तदुपहितत्वाज्ज्ञानशक्तिप्रा
धान्येन हिरण्यगर्भः क्रियाशक्तिप्राधान्येन प्राण इति च व्यपदेशः इति योजना। तथा च श्रुतिवचनानि वायुर्वै गौतम तत्सूत्रं वायु
नावै गौतम सूत्रेणेति हिरण्यगर्भः समवर्त्तताग्रे हिरण्यगर्भं जनयामास पूर्वमिति। कतम एको देवः प्राण इति चैवमादीनि। प्राण इति
२७ ५ चोच्यत इति चशब्दात्कः प्रज्ञातिर्ब्रह्मेत्यादिव्यपदेशांतराणि समुच्चीयंते। एवमुपहितस्य व्यपदेशभेदानुक्त्वोपाधेरपि तान
नाह। अस्यैषेत्यादिना। स्थूलप्रपंचो विराट् विज्ञानमयादिकोशत्रयं लिंगशरीरं सूक्ष्मशरीरमिति संबंधः मध्यप्रदीपन्यायेन
नोत्तरत्रापि जाग्रद्वासनेत्यत्र कोशत्रयपदं संबध्यते। वासनामयत्वं चास्य श्रुतिराह तस्यैतस्य पुरुषस्य रूपं यथा माहारजनं वा

अस्यैषा समष्टिः स्थूलप्रपंचापेक्षया सूक्ष्मत्वात्सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नः। अत एव
स्थूलशरीरलयस्थानमिति चोच्यते। एतदुपहितं चैतन्यं तैजसो भवति। तेजोमयांतःकरणोपहितत्वात्। अस्या
पीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिति हेतोरेव सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जा॰ ग्रोय पापांड्वाविकमित्या

दिासकृद्विद्युतमित्यतेन स्वप्नत्वं चास्या व्याहतविराजोः संध्यस्थानत्वादुपपन्नं। संध्यं तृतीयं स्वप्नस्थानमिति श्रुतेरविशेषात् अयतो॰
वासनामय अत एवेति योजना। अस्य लोकस्य सर्वावतो मात्रामुपादाय स्वयं विहत्येत्याद्या स्वप्नेन शरीरमभिप्रहत्य त्याद्याच
श्रुतिः स्थूलशरीरस्य स्वप्ने लयं दर्शयंती तत्समष्टेर्महाप्रपंचस्यापि संध्यौ तं सूचयति। एवं समष्टिलिंगतदुपहितचैतन्ययोर्व्यप
देशानुक्त्वा व्यष्टिलिंगतदुपहितचैतन्ययोरपि तानाह। एतदिति। तैजसव्यपदेशत्वे हेतुमाह। तेजोमयेति। तेजोमयत्वं वासना
मयत्वं। स्वयं निर्माय स्वेन भासेति श्रुतौ भाःशब्देनांतःकरणस्य वासनात्मनो व्याख्यातत्वात्। अस्यापीति। स्पष्टार्थः॥ श्री॰ राम

यो वै प्राणः स वायुरिति श्रुतेः समष्टिव्यष्टिलिंगयोस्तदवस्थयोरपि संध्ययोरभेदं सिद्धवत्कृत्य तत्र तैजससूत्रयोर्भोगविशेषं निर्दिशति
। एतावितितदानीं स्वप्नावस्थायां निद्रादिदोषदूषितस्मादृष्टादिसमुद्बोधितसंस्कारविशेषसचिवसंतःकरणस्थयाः संस्कारानुरूपा
वृत्तयस्ताहंगतःकरणसंसृष्टचैतन्यस्थाविद्याशक्तिविजृम्भितविषयाकारास्ताभिः सूक्ष्मविषयान् जाग्रद्वासनामयान् ईश्व
दस्फुटाननुभवत इत्यर्थः। न स्वप्नं स्मृतिरपरोक्षावभासित्वात्। नापि प्रत्यक्षप्रमा। संयोगाद्यभावात्। न च सुषुप्तिः। स्पष्टविषय १ दे प्र २
यानुभवात्। नापि जागरितं। तदुचितदेशकालनिमित्तानामसंभवात्। तथा हि यथा केशः सहस्रधा भिन्न इत्यादिना केशसहस्रां
शेन नाडीरूपमीयणताभिर्वा एतदा स्त्रवदा स्रवतीति स्वप्नायतां दशनाडीप्रवेशं दर्शयति श्रुतिः। तथा तिसृक्ष्मासु नाडीषु स्वप्नं पश्यतो

गृहासनामयत्वात् स्वप्नः। अत एव स्थूलशरीरलयस्थानमिति चोच्यते। एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः

न नदीसमुद्रवनगिरिनगरीनिवेशोचितोदेशोस्ति येन तत्र स्थितान् द्यादीन् पश्येत। ननु वहिः कुलायादमृतश्चरित्वेति श्रुतेर्वहिरेव
स्वप्नान् पश्यतीति चेन्न। तत्र वहिः शब्देन स्थूलशरीरोपरागाभावमात्रस्य विवक्षितत्वात्। अन्यथा तस्मिन्नेव शरीरे नियमेन पुनः
जागरणानुपपत्तेः। तथा च श्रुतं तरं कुरुषु हमद्यशयानो निद्राभिप्लुतः स्वप्ने पंचालान् अधिगतश्चास्मि न प्रतिबुद्धश्चेति। स्वप्नप्राप्त
देशांतरात्पुनरागमनरहितस्यापि स्वप्नदेशस्थशरीरे जागरणं दर्शयति। अतो न तत्र जाग्रदुचितोदेशः। नापि कालस्तदुचितः संभव
ति। मुहूर्त्तमात्रेपि संवत्सरशतानामनुभवात्। नाप्युचितं निमित्तं तत्र संभवति। तत्तदारम्भदाद्यभावेप्यकस्मादेव प्रासादादेर्नि
ष्पत्तिदर्शनात्। जाग्रदवस्थापन्नानां वस्तूनां स्वप्नेभावं दर्शयित्वा नूतनानां वासनात्मकानां निर्माणं दर्शयति श्रुतिः। न तत्र र

वे·सा·
टी·२८
९४

ध्यानेनाभवंत्यथ रथान्रथयोगान्पथः सृजत इत्यादिना तस्मान्मायामय एव स्वप्न इति द्रष्टव्यं तथाच न्यायः मायामात्रं तु कार्त्स्न्येना
नभिव्यक्तस्वरूपत्वादिति। उक्तेऽर्थे प्रमाणमाह। प्रविविक्तभुगिति। आदिशब्दात् तस्मादेष प्रविविक्ताहारतर इवैव भवतीत्यादिश्रु
त्यंतरग्रहः। अत्रापीति स्पष्टार्थः। सूक्ष्मशरीरप्रपंचनमुपसंहरति। एवमिति। पूर्वत्र प्रतिज्ञातानि स्थूलभूतानि प्रपंचयति। स्थूलेति
ति। पूर्वोक्तानामेव भूतानां परस्परं व्यवहर्तृप्राणिनिकायव्यवहारनिर्वाहकतदीयधर्माधर्मापेक्षपरमेश्वरसान्निध्यादिनिमित्तापे

प्रविविक्तभुक्तैजस इत्यादिश्रुतेः। अत्रापि व्यष्टिसमष्ट्योस्तदुपहितयोः सूत्रात्मतैजसयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवज्जलाशय
जलवत्तद्गतप्रतिबिंबाकाशवच्चाभेदः। एवं सूक्ष्मशरीरोत्पत्तिः। स्थूलभूतानि तु पंचीकृतानि। पंचीकरणं तु आकाशादिपंचस्वेकै
कं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान्पंच भागान्प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीय प
भागपरित्यागेन भागांतरेषु संयोजनं। तदुक्तं द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः स्वस्वेतरद्वितीयांशैर्योजनात्पंच पंच ते इति।
अस्याप्रामाण्यं नाशंकनीयं। त्रिवृत्करणश्रुतेः पंचीकरणस्याप्युपलक्षणत्वात्।
तथा विभागेन मिलितानां स्थूलतापत्तिः पंची

करणमित्याह। पंचीकरणं त्विति। ननु कथमित्थं विभागेन पंचीकरणं निरूप्यते तत्र प्रमाणाभावादित्याशंक्याह। अस्येति। सेयं देव
तैक्षत हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति
इति त्वा सा सदाख्या परमात्मा देवतासृष्टानां तिसृणां देवतानां तेजोबन्नात्मिकानां मध्ये एकैकां देवतां त्रिवृतां त्रिरूपामकरो
त्कृतवतीति त्रिवृत्करणश्रुतिः सा पंचीकरणमप्युपलक्षयति आदिपतीत्यर्थः। त्रिवृत्करणं नाम तेजोबन्नानां त्रयाणाम

राम
२८

द्विधा समं विभज्य पुनरेकैकभागस्य द्विधा विभागं कृत्वा स्वस्वद्वितीयं स्थूलं भागं परित्यज्यान्यदीयस्थूलभागयोरेकैकस्य भा
गस्य संयोजनं। अत्र केचिदर्वाग्गल्भंते संप्रदायाध्वनापंचीकरणं यद्यपि स्थितं तथापि युक्तिदृष्टत्वाद्वाचस्पतिमतं श्रुत्यभिमता
दिना तत्रयुक्तिं चेत्थमाचक्षते गगनपवनयोः किलपृथिव्याद्यात्मत्वे रूपवत्त्वमहत्त्वाभ्यां चाक्षुषत्वं तयोः प्रसज्येतेति
तत्र त्रिवृत्करणपक्षेपि तेजसः पृथिव्यवात्मत्वे काठिन्यद्रवत्वाभ्यां विशिष्टतयोपलंभप्रसंग इति दोषसाम्ये शंकिते अर्द्धभू
यस्त्वान्न दोष इति परिहारस्य पंचीकरणेपि समानत्वेन दूषणोद्धारे व्यवहारमार्गप्राप्तपंचीकृतिर्मुधा पंचीकरणस्य कुत्रा
तिह प्यश्रवणादि। तत्रेदं वक्तव्यं किं पंचीकरणं व्यवहारमार्गासिद्धत्वादप्रामाण्यं किं वाऽश्रुतत्वादाहोस्वित्त्रिवृत्करणश्रु
तिविरोधादिति। आद्ये अष्टकाकरणादीनां शिष्टव्यवहाराणामप्रामाणिकत्वापत्तिः। द्वितीयेपि किं साक्षाच्छ्रवणाभा
वो हेतुरुतश्रुतार्थापत्त्यभावोपि। नाद्यः साक्षादश्रुतस्य प्रत्याख्याने परमाणूर्वादीनामपि प्रत्याख्यानप्रसंगात्। नद्वितीयः
इहश्रुतार्थापत्तेर्विद्यमानत्वात्। तथाहि छांदोग्ये तेजः प्रभृतीनां त्रयाणां सृष्टिश्रुतौ तावच्छ्रुतं तत्र प्रसिद्धाकाशवा
युसृष्टेरप्युपसंहरणीयत्वं वियदधिकरणे तेजोधिकरणे च निर्द्धारितं। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाहान्यादि
भिर्हेतुभिस्तथा च श्रुतं तत्रैकवाक्यतया पंचानां भूतानां सृष्टिं प्रक्रम्य तेषां सूक्ष्मतया व्यवहार्याणां व्यवहारसिद्धये
त्रिवृत्करणं ब्रुवंतीति श्रुतिः पंचीकरणाभिप्राया चेन्न स्यात्तदा वाय्वाकाशयोः सूक्ष्मत्वान्निवृत्तेरव्यवहार्यतापत्तौ सृष्टा
नां भूतानां व्यवहाराय त्रिवृत्करणोपदेशानुपपत्तिः केन वार्यते। न च वाय्वाकाशयोर्व्यवहार एव नास्तीति वाच्यं। महान्वा
युर्महन्नभ इति व्यवहारस्य सर्वजनीनत्वात्। ननु श्रुत्युक्तमित्येव त्रिवृत्करणं स्वीक्रियते न व्यवहारायेति चेन्न त्रिवृत्करण
वाक्ये स्वसंबंधिनः फलस्याभावात्फलवदात्मैक्यज्ञानार्थवादत्वे यथा सृष्टिन्यायं त्रिवृत्करणं युक्तं। अर्द्धजरत्याश्चान्या

वे॰सा॰
टी॰ २९

29

छांदोग्यते त्तरीयादिश्रुत्योर्विरोधपरिहारायोपसंहारः क्रियते न तथा पंचीकरणं क्वचिच्छ्रुतमस्ति येन तन्न्यायोनुसरणीयः स्या
दिति चेत्। सत्यं तथापि न्यायानुसरणं युक्तं। यथा त्रिसर्गश्रुतौ सृष्टानां भूतानां स्फुटतरव्यवहारनामरूपव्याकरणोपायतया
त्रिवृत्करणं श्रुतं तद्वत्। भूतपंचकसर्गश्रुतावपि तथा नामरूपव्याकरणोपायः कश्चिदीश्वरस्येति तु युक्तः स चोपायविशेषः
तस्यैवेश्वरस्य भूतयोनेः शास्त्रांतरे त्रिवृत्करणरूपः श्रुतः तत्परित्यागेनान्यस्य कल्पनायां प्रमाणाभावात्। तस्यैव पंचसर्गश्रु
तावप्युपसंहारे प्राप्ते तस्य पंचीकरणार्थत्वमंतरेण पंचानां भूतानां स्फुटतरव्यवहारोपायतानुपपत्तेर्युक्तं त्रिवृत्करण
वाक्यस्य पंचीकरणोपलक्षणत्वमिति। एतेन चरमः पक्षः प्रतिक्षिप्तः त्रिवृत्करणश्रुतेः पंचीकरणार्थनिरूपणे कृते तेन पं

पंचानां पंचात्मकत्वे समानेपि वैशेष्यात्तु तद्वादः तद्वाद इति न्यायेनाकाशादिव्यपदेशः संभवति। तदानीमाकाशे शब्दोभिव्यज्य
ते वायौ शब्दस्पर्शौ अग्नौ शब्दस्पर्शरूपाणि अप्सु शब्दस्पर्शरूपरसाः पृथिव्यां शब्दस्पर्शरूपरसगंधाश्च। ॥=॥=॥=॥

चीकरणस्याविरोधासंभवात्। श्रुत्यभिप्रायश्चैवं वर्णितो विद्वत्तमैराचार्यैः आकाशस्य सर्वावकाशतया सर्वाव्यतिरेकाद्वा
योश्च सर्वचेष्टाहेतुत्वेन सर्वाविनाभूतत्वात्तयोस्तेजःप्रभृतिष्वंतर्भावे सिद्धवत्कृत्य त्रिवृत्करणप्रयोगसौकार्यार्थं श्रुति
र्वर्णयांबभूवेति तस्मादस्ति पंचीकरणं प्रामाणिकमित्यलमतिनिर्बंधेन। ननु पृथिव्यादीनां भूतानां चेत्सर्वभूतात्मकत्वं त
था सति व्यवहारसांकर्यप्रसंग इत्याशंक्याह। पंचानामिति। वैशेष्याद्विशेषभावात् भागाधिक्यात्तद्वादो नभः पवनस्तेजो
जलं पृथिवीत्यादिव्यपदेशो भवतीति द्वितीयाध्यायसमाप्त्यधिकरणे न्यायेन निर्णयः कृतस्तेन न्यायेनाकाशादौ व्यवहारा राम
सांकर्यं सिध्यतीत्यभिप्रायः। इदानीं भूतानां पंचीकृतत्वे लिंगं चाह। तदानीमिति। ॥ २९

तदानीं पञ्चीकरणानन्तरं आकाशे शब्दोऽभिव्यज्यते स्फुटतयेति सर्वत्र योजनीयं। एतदुक्तं भवति आकाशादीनां पूर्वपू
र्वस्योत्तरोत्तरं प्रति कारणत्वेन स्वस्वकार्यापेक्षया व्यापकत्वात्कार्यांशसंवलितत्वेऽपि न कार्यगतगुणाश्रयतयाऽप्यभिव्य
क्तिः। किं तु स्वस्वगुणाश्रयतयैव तथा कार्याणां स्वकारणापेक्षयाऽल्पत्वात्तेषां कारणभागसंमिश्रतानां कारणगुणाश्र
यतयाऽपि भवत्यभिव्यक्तिरिति। तथा च लोके अनुभवः प्रचण्डशब्दो वायुः प्रजल्पति ज्वाला नदी संघुष्यति स्फुटत्यमानः पाषा
णः क्रोशतीत्यादिः स्पर्शादीनां तेजःप्रभृतिषु सद्भावेऽविवाद एव। न चैवमनुभवो भ्रान्तिः। व्यवहारदशायां बाधादर्शनात्।।
तथा च प्रतिनियताश्रया अपि शब्दादयो गुणाः यथायथं भूतान्तरेष्वप्युपलभ्यमाना भूतानां पञ्चीकृतत्वं गमयन्तीति। एवंभू

एतेभ्यः पञ्चीकृतेभ्यो भूर्भुवःस्वर्महर्जनस्तपःसत्यमित्येतन्नामकानामुपर्युपरि विद्यमानानामतलवितलसुतलरसातलतला
तलमहातलपातालनामकानामधोऽधो विद्यमानानां लोकानामन्तर्गतानां ब्रह्माण्डस्य चतुर्विधस्थूलशरीराणां तदु
चितानामन्नपानानां चोत्पत्तिर्भवति। शारीराणि जरायुजाण्डजस्वेदजोद्भिज्जाख्यानि। जरायुजानि जरायुभ्यो जातानि मनुष्य
पश्वादीनि।।७।।

तादृशं पञ्चपञ्चभौतिकार्योपमाह। एतेभ्य इति। भूरादयः प्राणिनां कर्मज्ञानफलभोगस्थानविशेषाः यथापाठक्रममुपर्युपरि वर्त्त
मानाः सप्तभूमेरधोऽधश्च पाठक्रमेण वर्त्तमाना अतलादयः सप्तेत्येवं चतुर्दश लोकाः। एत एव लोकाः स्वावरणभूतलो
कालोकपर्वततद्बाह्यपृथिवीतद्बाह्यसमुद्रैः सहिताः ब्रह्माण्डमित्युच्यते। अस्य परिमाणं श्रुतौ संकीर्त्तितं द्वात्रिंशतं वै
देवरथाह्न्यान्ययं लोकस्तं समन्तं पृथिवी द्विस्तावत्पर्येति तां पृथिवीं द्विस्तावत्समुद्रः पर्येतीति। शारीराणां चातुर्विध्यं
स्पष्टयति। शारीराणीति। यथोद्देशक्रमं शारीराणि लक्षयति। जरायुजानीत्यादिना। ननु वैशेषिकाः प्रत्यक्षाप्रत्यक्ष
वृत्तेरप्रत्यक्षत्वात्पञ्चात्मकत्वं न विद्यत इति वदन्तोऽप्रत्यक्षाभ्यां वाय्वाकाशाभ्यां सह पृथिव्यादिभिरारभ्यमा।

वे॰ सा॰
टी॰ ३॰

30

णानां शरीराणामप्रत्यक्षत्वप्रसंगाच्च पंचभौतिकं शरीरमित्याहुस्तत्कथं पंचभ्यो भूतेभ्यश्चतुर्विधभूतग्रामस्योत्पत्तिरु
च्यत इति चेत्। अत्राहुः अस्ति हि शरीरे सर्वेषामपि भूतानां कार्यसंप्रतिपत्तिः अवकाशव्यूहनपचनक्लेदनकाठिन्या
नां सर्वजनानुभवसिद्धत्वात्। अतस्तत्कारणतया पंचापि भूतान्येकस्मिन्देहे संतीति स्थितौ यदि तेषां भूतानां देहा
वयवत्वाभावो वृत्तिलाभमात्रेणैव स्यात्तदा तदुपगमानपगमाभ्यां देहस्यापचयोपचयौ न स्यातां दृश्येते तु तयोः सतोरुप
चयापचयौ। अतस्तंतुपटयोरिवावयवावयविभावमेव पंचभूतदेहयोर्युक्तं पार्थिवे कार्ये पार्थिवानां भूतानां वृत्तिलाभमा
त्रेणैव तु तदुपगमापगमाभ्यां तस्यापचयापचयायोगात्। नहि वस्त्रस्यानारंभकसलिलद्रव्यादीनां तत्स्वतदवस्थायामुपच(

अंडजानि अंडेभ्यो जातानि पक्षिपन्नगादीनि। उद्भिज्जानि भूमिमुद्भिद्य जातानि कदंबदूर्वादीनि। स्वेदजानि स्वेदेभ्यो जातानि
यूकामशकादीनि।))

यस्तदुपगमेवापचयोक्तिः। तदायामविस्तारयोस्तदवस्थत्वदर्शनात्। तथा च जलहृदयोरपि पावकपवनोपगमापगमाभ्यां परि
माणान्यथात्वं न दृश्येत। तथा च यदि भस्त्रादावपि पार्थिवे देहे भूतांतरस्य वृत्तिमात्रता स्यात्तर्हि भस्त्रादिदेहयोरविशेषेण व्यू
हनादीनां सत्त्वमसत्त्वं वा तुल्यवत्प्रसज्जे [redacted] ता। अदृष्टवदात्ममनःसंयोगतज्जन्यप्रयत्नादिकारणांतरस्याप्युभयत्र
समानत्वस्यापादयितुं शक्यत्वात्। न च प्रत्यक्षाप्रत्यक्षवृत्तेः शरीरस्याप्रत्यक्षत्वं शंकनीयं प्रत्यक्षाप्रत्यक्षावयववृत्तीनामव
यविनामप्रत्यक्षत्वप्रसंगात्। न च स्पर्शशून्यत्वादेकद्रव्यत्वाच्चाकाशस्यारंभकत्वानुपपत्तिरिति वाच्यं। आरंभवादस्यानंगी
कारात्। एकस्यापि दुग्धावयविनो दध्यारंभकत्वदर्शनात्। न च दुग्धावयवैरेव दध्यारभ्यत इति वाच्यं। तथा सति दधिदुग्धयो

गंधरसादिवैषम्यं न स्यात्। दुग्धस्यैव सतः परिणामो
दधीत्यभ्युपगमे स्याद्दुग्धादिवैषम्यं स्पर्शशून्यमपि द्र
प्र॰ प ५६

रे॰ राम

त्वं यथा गुणारंभकं दृष्टं तथा द्रव्यारंभकमप्यस्तु श्रुतिरपि शरीरस्य पंचीकरणं द्रव्यारब्धतां श्रावयति । अन्नमशितं त्रेधा
विधीयत इत्यादौ । याज्ञवल्क्योप्याह पंच धातून्स्वयं षष्ठ आदत्ते युगपत्प्रभुरिति । वस्तुतस्तु पंचानां भूतानां पंचात्म ।
कत्वस्य दर्शितत्वादारंभवादस्य निराकृतत्वाच्च नात्रोदयनाद्युक्तदोषशंकावकाशोपीति गमयितव्यं तस्मात्सिद्धं श
रीरं पांचभौतिकमिति । अत्रापीति स्पष्टार्थः । स्थूलसमष्ट्युपहितस्य चैतन्यस्य व्यपदेशभेदमाह । एतत्समष्टीति । चकारात्तु २४
तु यादि शब्द ग्रह उच्यते यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते सैषा विराडन्नादी पुरुष एवेदं सर्वमि

अत्रापि चतुर्विधस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिर्वृक्षवज्जलवद्वा व्यष्टिरपि भवति । एतत्सम ।
ष्ट्युपहितं चैतन्यं वैश्वानरो विराडिति चोच्यते । सर्वनराभिमानित्वाद्विविधं राजमानत्वाच्च । अस्यैषा समष्टिः स्थूलशरीरमन्नवि ।
कारत्वादन्नमयः कोशः स्थूलभोगायतनत्वाज्जाग्रदित्युच्यते । एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते । सूक्ष्मशरीरमपरित्यज्य
स्थूलशरीरादिप्रविष्टत्वात् । अस्याप्येषा व्यष्टिः स्थूलशरीरमन्नविकारत्वादेव हेतोरन्नमयकोशः स्थूलभोगायतनत्वाज्जा

त्यादि श्रुतिभिरिति शेषः तत्र हेतूनाह । सर्वनरेति । सर्वशब्दो विश्वपर्यायः विश्वानराभिमानित्वाद्वैश्वानरः विविधं राजमानस्त्व ।
द्विराट् चकारात्पूर्णत्वात्पुरुष इति च द्रष्टव्यं । उपहितस्य व्यपदेशानुक्त्वोपाधेरपि तानाह । अस्यैषेति । अन्नं वै विराडिति श्रुतेरन्
न्नविकारत्वं । स्थूलभोगेति । स्पष्टो भोगः । एवं समष्टिस्थूलतदुपहितचैतन्ययोर्व्यपदेशभेदं दर्शयित्वा व्यष्टिस्थूलतदुप
हितयोरपि तमाह । एतद्व्यष्टीति । व्यष्टिस्थूलशरीरोपहितस्य विश्वशब्दवाच्यत्वे हेतुमाह । सूक्ष्मेति । सूक्ष्मशरीरं कारण
शरीरं तदपरित्यज्य स्थूलशरीरादौ तदपेक्षया स्थूलशरीरं लिंगशरीरं तदादिर्यस्य परमस्थूलशरीरस्येति तद्गुणसं ।

वे॰ सा॰
टी॰ ३१

विज्ञानो बहुर्व्रीहिस्तस्मिन्प्रविष्टत्वात्। तथाहि जीवस्यहि त्रय उपाधयः सुषुप्तादौ बुद्ध्यादिसंस्कारोपरंजिताज्ञानमात्रमु
पाधिः स्वप्ने जाग्रद्वासनामयं लिंगशरीरमुपाधिः जाग्रदवस्थायां तु सूक्ष्मशरीरसंसृष्टस्थूलशरीरमुपाधिः तथा च पूर्वपूर्वो
पाधिविशिष्टस्यैवोत्तरोत्तरोपाधिप्रवेशात्सर्वशरीरप्रविष्टत्वेन स्थूलभोगायतनाभिमानिनो विश्व इति संज्ञेति। यद्वा
सूक्ष्मशरीरं लिंगशरीरं तदपरित्यज्य स्थूलशरीरं विराट् व्यष्टिस्तदादिर्यासां चक्षुरादिदेवतानां तन्नाद्विषयाकाराणां च तत्तत्प्र
विष्टत्वादिति हेतुयोजना। स्थूलशरीरमपरित्यज्येति क्वचित्पाठे स्थूलशरीरे वर्त्तमानस्यैव सूक्ष्मशरीरकारणशरीरयोरप्यनु

तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियंत्रितेन श्रोत्रादीन्द्रियपंचकेन क्रमाच्छब्दस्पर्शरूपरसगंधान
प अग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमान्नियंत्रितेन वागादीन्द्रियपंचकेन क्रमाद्वचनादानगमनविसर्गानंदानु चंद्र चतुर्मुखशंकराच्यु
तैः क्रमान्नियंत्रितेन मनोबुद्ध्यहंकारचित्ताख्येनांतरेन्द्रियचतुष्केण क्रमात्संकल्पनिश्चयाहंकृति चैत्तांश्च सर्वानेता
न्स्थूलविषयाननुभवतः। जागरितस्थानो बहिः प्रज्ञ इत्यादिश्रुतेः॥ ५
नुगतत्वादिति हेत्वर्थोनुसंधेयः। सर्वथा विश्वशरीरव
र्त्तित्वाद्विश्व इत्युक्तं भवतीतिभावः। अस्यापीति पूर्ववत्। एषेति व्यष्टिरुच्यते। पूर्ववद्विश्ववैश्वानरयोरपि जाग्रत्स्थित्यवस्थापन्नभोग
विशेषं समप्रकारं प्रपंचयति। तदानीमित्यादिना। दिग्वादिपंचदेवतानियंत्रितेन श्रोत्रादीन्द्रियपंचकेन यथापाठक्रमं शब्दादिगंधां
तान्स्थूलविषयाननुभवत इति प्रत्येकं योजनीयं। अग्न्यादिदेवतापंचकनियंत्रितेन वागादिपंचकेन वचनाद्यानंदांतान्त
था चंद्रादिदेवताचतुष्टयनियंत्रितेन मनआदिचतुष्केण संकल्पादिचैत्तांतांश्चतुरः सर्वानेतानिति। यथायथं यथोक्त
क्रमानुरोधेन सर्वानेतान्स्थूलभोगान्विषयाननुभवत इत्यर्थः। अत्रापि प्रमाणमाह। जागरितेति। आदिशब्दात्स्थूलभुग्वैश्वानर राम

३१

इदमत्र वोद्धव्यं जाग्रदवस्थायां हि प्रमातृप्रमाणप्रमेयव्यवहारा भवंति तत्र प्रमाणैर्येर्थं प्रमिणोति स प्रमाता येन प्रमिणोति तत्प्रमा
णं यत्प्रमीयते तत्प्रमेयमिति सर्वतंत्रसिद्धांतः। तत्र यः प्रमाता जीवश्चेतनः स विषयं प्रमिणवन्कया प्रत्यासत्त्या प्रमिणोतीति विचारणी
यं। आत्ममनइंद्रियविषयाणां क्रमेण संयोगपरंपरयेति चेन्न। विषयसंयुक्ततत्संयुक्तेष्वपि संयोगपरंपरया युगपत्सर्वावभासप्रसंगात्
व५ । यत्रेंद्रियसंवंधस्तावदेवभासेतेति नातिप्रसंग इति चेन्न। इंद्रियसंनिकर्षस्यापीयत्तानवधारणात्। इंद्रियकर्षानंतरं यो र्थः स्फुरति ता। संनि५
वन्मात्रे सन्निकृष्यत इति चेन्न। इंद्रियसन्निकर्षस्येयत्तावधारणे तत्स्फुरणस्य विषयनियमस्तस्मिन्नसतींद्रियसन्निकर्षेयत्तावधा
रणमिति परस्पराश्रयात्। किंचोक्तसन्निकर्षस्य ज्ञानोत्पत्तिमात्रेलक्षणत्वात्तदनंतरं तस्यावस्थानेकस्य काभावान्न ज्ञानस्य विषये।
ण संवंधः स्यात्। तथा च मयेदं विदितमिति स्वात्मनि संवंधानुसंधानाभावप्रसंगः। न चाश्रयद्वारा संवंध इति वाच्यं। ज्ञानस्य सर्वगता।
त्माश्रयत्वे युगपत्सर्वविषयसंवंधात्सर्वावभासप्रसंगः। देहावच्छिन्नात्मप्रदेशाश्रितत्वे देहस्य विषयासंवंधान्नवाद्यं किंचिदपि भाया।
त्। ननु संवंधाभावेपि ज्ञानज्ञेययोरदृष्ट एव विषये ज्ञानमतिशयं जनयतीति नैव व्यवस्थेति चेन्न। अनुद्दिष्टेष्वपि दुर्गंधादिषु ज्ञानहे
तातिशयदर्शनात्। अदृष्टवशात्किंचिदेवभासत इति चेन्न। तस्यादृष्टसामग्रीसंपादकत्वेनान्यथासिद्धत्वात्। अगतिकगतित्वाच्च।।
तस्मान्न किंचिदेतत्। अतो वक्तव्या जीवस्य विषयग्रहणव्यवहारे व्यवस्थेति। तदुच्यते न तावदस्मन्मतेनुपपत्तिरस्ति यतो जीवः सर्व
गतत्वासर्वगतत्वपक्षयोरप्यंतःकरणकृतावस्था संभवति। तथा हि अपरिच्छिन्नपक्षे तावदंतःकरणमेव मनोबुद्ध्यादिशब्दवाच्यं।
प्रमातृत्वादिव्यवहारापादकं। यतो विद्यावृततया सर्वत्राप्रकाशमानमप्यात्मचैतन्यमंतःकरणसंसृष्टं सदवभासते दर्पणाद्द्रव्यसंसृष्ट।
रविरश्मिवत्। तच्चांतःकरणं महदादिसहायं विषयसंवेदनवेलायां तडागकुल्यादेत्रगतोदकप्रवाहवद्देहतद्बाह्यदेशातकृतविषयाना।
भिव्याप्यावतिष्ठते। तत्र च तिसृष्वप्यवस्थास्वात्मचैतन्यं तदात्मनैवाभिव्यज्यते। तत्र देहमध्यांतःकरणभागावच्छिन्नं चैतन्यं प्रमातृ

वे॰ सा॰ टी॰ ३२

32

संज्ञां लभते। देहविषययोर्मध्ये दीर्घप्रभाकारेणेंद्रियाणां द्वारा निर्गता ततः करणभागावच्छिन्नं प्रमाणसंज्ञां विषयमभिव्याप्य विषया-
कारतया व्यवस्थिता ततः करणभागावच्छिन्नं प्रमेयसंज्ञामिति प्रमातृप्रमाणप्रमेयव्यवस्थोपपत्तिः। एवमभ्युपगमे येन विषयेण स-
हेंद्रियस्य सन्निकर्षो दूरे वांतिके वावतिष्ठमानेन तत्रैव तदाकारमेवांतःकरणंपरिणतेनान्यत्र नान्याकारं चेति लभ्यते तदनुरक्त म ३
चैतन्यात्मनश्चैककत्वान्मयेदं विदितमिति संबंधावभासश्चोपपद्यते नान्यथा। परिच्छिन्नात्मपक्षेपि जीवत्वोपाध्यंतःकरणस्य पूर्वो-
क्तप्रकारेणावस्थाभेदसंभवे उपाध्यनुगामित्वादुपहितस्य स्वोपाध्यंतःकरणं यद्यदात्मनावतिष्ठते तत्तदात्मनाप्रत्यगात्मचैत-
न्यमप्यवभासमानं ग्राह्यग्रहणग्राहकभेदव्यवस्थामनुभवत्यग्निरिवायःपिंडादिसमारूढ इत्यनवद्यं। न चैवं कल्प-
मू १ ना तार्किककल्पनावत्स्वतर्कबुद्ध्युत्प्रेक्षामूला किंतु श्रुतिमूला। तथा च श्रुतयः। स समानः सन्नुभौ लोकावनुसंचरति ध्यायती-
वल्लेलायतीव स्वप्नो भूत्वेमं लोकमतिक्रामति। नवद्वारे देहे हंसो लेलायते बहिः। आसीनो दूरं व्रजति। मनोमयो विज्ञान-
व मय इत्यादयः। उक्तं च भगवत्पादैः सर्वश्रुत्यर्थसंग्रहे दक्षिणामूर्तिस्तोत्रे नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पंदते जानामीति तमेव भांतमनुभात्येतत्समस्तं जगत्तस्मै श्रीगुरुमूर्त्तये नम इदं श्री-
दक्षिणामूर्त्तय इति। युक्तिरपि मनो वाह्यविषयदेशगमनाभावे इंद्रियसन्निकर्षपरंपरया देहांतरेण च विषयाकारत्वास्वी-
कारे बहिरेव तावति दूरे यं विषयो मयोपलब्ध इति प्रतिसंधानं न स्यात्। अनेकायामविस्तीर्णदेशतन्निष्ठरथगजाद्या-
कारभावस्यांतर्हृदयेनुपपत्तेः। न च स्वप्नवदुपपद्यत इति वाच्यं। स्वप्नस्य मायामयत्वोक्तत्वात्। जाग्रदपि मायामयमेवे-
ति चेत्। सत्यं तथापि स्वप्नाद्व्यवहारभेदसिद्धये तयोः किंचिदप्यस्ति वैषम्यं सति प्रमातरि वाध्यमानत्वावाध्यमान राम ३२

त्वाभिमानादिलक्षणं। नन्वेवं घटाद्याकारवृत्तिरंतरेव जायत इति चेन्न। वाढं सा हि देहाद्यावरणमुपमर्द्यैवं नी
जायते वाह्यविषयानुनैवमिति वैषम्यं तु स्यात्। किंच यदि विषयेंद्रियसंबंधमात्रमंतःकरणस्य विषयाकारहेतु
स्तदा दूरवर्त्तिविषयगतपरिमाणरूपसंख्यादीनामपि तदाकाराकारितेंतःकरणे यथावदवभासप्रसंगः। न च दूर
त्वलक्षणदोषात्तथानावभासत इति वाच्यं। तस्येंद्रियसंबंधमात्रेप्रतिबंधकत्वाभावात्। ननु तथापींद्रियसं
स्पृष्टाकारतामनस इति स्थिते कथं दूरस्थविषयेयत्ताद्याकारता मनसो न भवेदिति चेत्। नैवं मम तु मनसो बहि
रस्त्वात् त्र्याद्याद्यावच्छिन्नैरवयवैरवयवैर्विभिर्वा चक्षुःसंनिकर्षस्तावन्मात्राकारमेव मनः परिणमत इति ज्ञिप्यते ते

अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितयोर्विश्ववैश्वानरयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्च
जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्च पूर्ववदभेदः। एवं पंचीकृतभूतेभ्यः स्थूलप्रपंचोत्पत्तिः।

वत्तुपदार्थसन्निकृष्टेंद्रिये सति तज्जतत्प्रयत्नस्वाल्पत्वदृढादृढत्वविशेषाज्ञानादरे प्यंतस्तदाकारवृत्त्युदयोपपत्तेर्विष
येयत्तादेरपि स्फुरणप्रसज्येतेतिवैषम्यात्। तस्मादस्तिप्रत्यक्षव्यवहारे वाह्यामनोवृत्तिर्विषयाकारेति स्थितं। परो
क्षव्यवहारे तु विशिष्टशब्दलिंगादिवृत्तिनिबंधनात्तदर्थाकाराधीरंतरेव समुन्मिषतेविषयसत्तामात्रस्यैवतत्र
स्फुरणात्तद्गतविशेषादेरस्फुरणाच्चेति दिक्। तथा च स्वप्नावस्थायामात्मा बुद्ध्युपाधिः स्वप्नदर्शनहेतुकर्मक्षये
जागरितमागच्छन्पूर्वेगृहीतेषु करणेषु पुनः स्वस्वगोलकस्थानेषु तथैव बुद्ध्या प्रसारितेषु सत्सु स्वयं तद्बुद्ध्यनुगत
सचिवस्तत्रेंद्रियैः
स्तत्र गोलकादिदेशं गच्छन्स्वोपाधेरंतःकरणेंद्रि
यैर्विषयाननुमेयांश्च स्थूलान्व्यावहारिकान्प
दार्थाननुभवति तदिदमस्य जागरितं। तदुक्तं इंद्रि
यैरर्थोपलब्धिर्जागरितमिति। अयमेव विश्वो वैश्वा
नरात्मनः स्थूलभोग इति। अत्राप्यनयोः स्थूलेत्या
दिपूर्ववत्। स्थूलप्रपंचाध्यासेतावस्थामुपपादितमुपसं
हरति। एवमिति॥

उक्तं प्रपंचत्रयं तदुपहितचैतन्यत्रयं च पूर्ववत्समष्ट्यंतमेकीभावमापादयति। एषामित्यारभ्य आभ्यामित्यतः प्राक्तनेन ग्रंथेनास्य
ष्टार्थीयं ग्रंथः फलितमाह। आभ्यामिति। तत्पदार्थविषयमध्यारोपमुपसंहरति। एवमिति। अधुना त्वंपदार्थविषयमध्यारोपं बहु
वादिमतोपन्यासेन दर्शयति। इदानीमिति। तत्रारुंधतीप्रदर्शनन्यायेन मुंजादिषीकाग्रहणन्यायेन वा प्रत्यं चं देहादिविविक्तं।
चिदेकतानमात्मानं दिदर्शयिषुरतिमूढमतेर्मतं तावदाह। अतिप्राकृत इति। अतिप्राकृतस्तु पुत्र आत्मेति वदतीत्यन्वयः। कु

एषां स्थूलसूक्ष्मकारणप्रपंचानामपि समष्टिरेको महान्प्रपंचो भवति। यथावांतरवनानां समष्टिरेकं महद्वनं यथा वा
तरजलाशयानां समष्टिरेको महान् जलाशयः। एतदुपहितं विश्ववैश्वानरादीश्वरपर्यंतं चैतन्यमप्यवांतरवनावच्छि
न्नाकाशवदवांतरजलाशयप्रतिबिंबाकाशवच्चैकमेव। आभ्यां महत्प्रपंचतदुपहितचैतन्याभ्यां तप्तायःपिंडवदविवि
क्तं सदनुपहितं चैतन्यं सर्वं खल्विदं ब्रह्मेति वाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमपि भवति। एवं वस्तुन्यवस्त्वारोपः सामा
न्येन दर्शितः। इदानीं प्रत्यगात्मनीदमिदमयमयमारोपयतीति विशेषत उच्यते। अतिप्राकृतस्त्वात्मा वै जायते पुत्र इत्या
दिश्रुतेः स्वस्मिन्निव स्वपुत्रे प्रियत्वदर्शनात्पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति। चार्वा
कस्तु स वा एष पुरुषोऽन्नरसमय इत्यादिश्रुतेः प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गमनदर्शनात्॥
तइत्यये द्वायां श्रुतियुक्त्यनु

भा भवांसानुक्रमेण प्रमाणयति। आत्मा वा इत्यादिना। स्वस्मिन्निवेति युक्तिकीर्तनं लोके हि पुत्रेणाइष्टं मिष्टं स्वाद्याद्यादि स्वात्मवच्चनेना
पि पुत्रेषु समर्पयंतस्तेषु परमप्रेम कुर्वंतस्तेषामात्मत्वमेव प्रकटयंतीति भावः। पुत्रेन ष्ट इत्याद्यनुभवोक्तिः। मतांतरमाह। चार्वाक इति॥
स्थूलशरीरमात्मेति वदतीत्यन्वयः। अत्रापि श्रुत्यादिप्रमाणं वदन्प्रागुपन्यस्तपक्षे दूषणं सूचयति। स वा एष इत्यादिना। एवमेवो

स वा एष औषधीनां रेतोरूपेण परिणतानां परिणामः प्रसिद्ध एष प्रत्यक्षः पुरुषः शिरःपाण्यात्मकोऽन्नरसमयोऽन्नरसविकारोऽन्नरसेनैवोपचीय
मानत्वादिति श्रुतेरर्थः। इह पुरुषशब्दस्य लोके आत्मनि प्रयोगात्तस्य च श्रुतावन्नरसमये देहे प्रयुक्तत्वाद्देह आत्मेति गम्यत इत्यभिप्राय
ः। परमप्रेमगोचरत्वमात्मन्येव विश्रांतमितरस्य सर्वस्यापि तच्छेषत्वेनैव प्रियत्वात्तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादंतरत
रं यदयमात्मेति श्रुतेः। सा च प्रीतिः पुत्रादपि देहेऽधिकतरा निरतिशया च दृष्टा। अन्यथा दह्यमाने गृहादौ देहं तत्पुत्रोपस्थिते पुत्रं परित्य
ज्य स्वस्य पलायमानानुपपत्तेरिति युक्त्यर्थः। अहंप्रत्ययश्चात्मानमवगाहत इति सर्ववादिनामविवादं स च स्थूलोऽहमित्यादिना
देहावलंबनोऽनुभूयते अतो देह एवात्मेत्यर्थः। लोकायतानां चार्वाकविशेषाणां मतभेदानाह। अपरश्चार्वाक इत्यादिना। वोद्धृत्त्वित्य

स्थूलोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति। अपरश्चार्वाकः। ते ह प्राणाः प्रजापतिं समेत्य ब्रूयुरित्यादिश्रुतेः इंद्रियाणामभावे श म१
रीरचलनाभावात्काणोऽहं बधिरोऽहमित्याद्यनुभवाच्चेंद्रियाण्यात्मेति वदति। अपरश्चार्वाकोऽन्योंऽतरात्मा प्राणमय इत्यादिश्रुतेः प्राणाभा
वे इंद्रियादिचलनाभावादहमशनायावानहं पिपासावानित्याद्यनुभवाच्च प्राणमय आत्मेति वदति॥

तैः प्राक्तनेन ग्रंथेनान्वयादिपूर्ववत्
प्राणानां वागादीनां प्रजापतिगमनं तत्प्रतिप्रश्नकरणं चाचेतनत्वेन संभवतीत्यनुपपत्त्या तेषां चैतन्यमवश्यंभावीति श्रुतार्थापत्तिरिहमा
नं न श्रुतिरिवेति द्रष्टव्यं। इंद्रियाणामभावे उपरमे त्वापादौ देहचलनस्य चैतन्यकार्यस्यादर्शनात्तदनुपरमे च तद्दर्शनादन्वयव्यतिरे
काभ्यामिंद्रियाण्येव चेतनानि न देह इति निश्चीयते। न च तेषां करणत्वेनापि ज्ञानान्वयव्यतिरेकोपपत्तौ तदाश्रयत्वकल्पनम
युक्तमिति वाच्यं। आश्रयसिद्ध्युत्तरकालीनत्वात्करणत्वकल्पनायास्तस्य चाश्रयत्वस्य देहेऽद्याप्यसिद्धिर्नान्यथोपपत्तिः। अतइं
द्रियाण्येवात्मानः काणत्वादेश्चाहमालंबनत्वमबाधितं देहे तु ममप्रत्ययबाधितत्वाज्ञाक्तमिति भावः। मुख्यप्राणात्मवादिमतमुत्थापयति।
अपर इति। अन्योऽन्नमयादात्मन इति योजना। स चान्नमयादंतरोऽभ्यंतर इत्यर्थः।

प्राणाभावे प्राणस्य स्वस्थितिनिबंधनान्नाद्यलाभेन कृशीभावे सति इंद्रियाणां विद्यमानानामपि स्वस्वविषयप्रवृत्त्यदर्शनात्सति
च तस्मिन्पुष्टे तद्दर्शनात्प्राण एवात्मा न प्राणाधीनस्थितिकानींद्रियाणीति। इंद्रियाणां चेतन्यान्वयव्यतिरेकः करणत्वेनाप्युप
पद्यत एव तेषामेव कर्तृत्वे करणाभावप्रसंगः किंचैकस्मिन्शरीरे इंद्रियाणां संभूय भोक्तृत्वं प्रत्येकं वा द्वितीयेपि युगपत्क्रमेण।
वा नाद्यः रूपादौ चक्षुरादिभोग्ये जिह्वादीनां भोक्तृत्वादर्शनात्। नहि संभूयेंद्रियैरेकं कार्यं निर्वर्त्त्यते तेषां प्रतिनियतासा
धारणविषयभेदस्यान्वयव्यतिरेकसिद्धत्वात्। न द्वितीयः उक्तेन प्रकारेण योगपद्यासंभवात् प्रत्येकं क्रमेण भोक्तृणींद्रिया
णीति तृतीयेपि पक्षे तेषां प्रत्येकं स्वातंत्र्ये कदाचिदनेकमत्येसति विरुद्धदिक्त्रियैस्तैरधिष्ठितं शरीरं विदीर्येत। अस्वातंत्र्ये यदधीन
वानहं विकल्पं

अन्यस्तु चार्वाकोन्यांतर आत्मा मनोमय इत्यादिश्रुतेः मनसि सुप्ते प्राणादेरभावात् अहं संकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति।

त्वं तेषां तस्यैवात्मत्वं युक्तं स्वामिभृत्यन्यायस्य शरीरैक्येऽनुपपत्तेः प्राण एव तु मुख्यः सर्वेषामिंद्रियाणामाश्रय इति युक्तं अत एवात्मा
स्वापप्रबोधयोरविच्छिन्नस्वभावः प्रत्येकमिंद्रियाणामात्मत्वेऽन्यदृष्टेन्यस्य स्मरणानुपपत्तेरिह च पश्यंश्चक्षुषा रूपमद्राक्षं स इदानीं
गंधं जिघ्रामीति प्रत्यभिज्ञा दृश्यते तस्मान्नेंद्रियाण्यात्मान इति भावः। अशनायापिपासयोश्च प्राणधर्मत्वं प्रसिद्धमन्नपानयोर
लाभे प्राणविच्छेददर्शनात्। तादृग्धर्मप्राणोहं प्रत्ययविषय इति प्राण आत्मेत्यनुभव इत्यर्थः। मन आत्मवादिमतमुत्थापयति।
अन्यस्त्विति। प्राणमयादन्योंतर आत्मेति यावत्। मनसि सुप्ते विलीने प्राणादेरभावादृतिवच्छ्वासोच्छ्वासदर्शनं तु दृष्टदृष्ट्यर्थं
रोपितत्वादिंद्रियाभावे स्वप्नस्मृत्योर्मनसि संप्रतिपत्तेर्मन एवात्मेत्यर्थः। यद्वा प्राणादेरभावादिति तद्व्यापारोपरमे सुषुप्ता। इंद्रियदृष्टि

राम

स्मा१

चेयेदमुच्यते। तथा चेंद्रियेषूपसंहृतव्यापारेषु प्राणे चोपसंहृतप्राणनापाननेतरवत्तौ मनसैव केवले न स्वप्नादेरुपलंभात्म
नएवात्मेत्यर्थः। मनसश्च संकल्पादिधर्मवत्त्वं प्रसिद्धमित्यनुभवोक्तैः स्पष्टार्थः। योगाचारमतमुत्थापयति। बौद्धस्त्विति।
मनोमयादन्योंतरोभ्यंतरः आत्मा विज्ञानमयः क्षणिकविज्ञानमय इति बौद्धाभिप्रायः। बुद्धिः क्षणिकविज्ञानमात्मेत्यत्रानुभ
वमाह। अहं कर्त्तेति। मनस एव कर्त्तृत्वं स्यात् किं विज्ञानेनेत्याशंक्य मनसः करणपदव्यपातित्वान्न कर्त्रेऽनुभवगोचरत्वमित्य
भिप्रेत्य युक्तिमाह। कर्त्तुरभाव इति। मनसः कर्त्तृत्वे सर्वेंद्रियाणां स्वस्वविषयैर्युगपत्संबंधे युगपज्ज्ञानोदयप्रसंगः कर्त्तुर्मन
सः सर्वेंद्रियैरधिष्ठातृत्वेन युगपत्संनिहितत्वादेव क्षणिकेयांतरानभ्युपगमाच्च। न चैवं दृश्यते तस्मान्मनसोन्यः कर्त्ता मन।
स्तु विज्ञानकर्महेतुः साधारणमेवेत्यर्थः। एवं वेदवाह्यवादानुपपन्नस्य विज्ञानमयकोशपर्यंतमात्मनः प्रत्यक्षमवगमिति। नच

बौद्धस्त्वन्योंतरात्मा विज्ञानमय इत्यादिश्रुतेः कर्त्तुरभावे करणस्य प्राप्तेरभावादहं कर्त्ता भोक्तेत्याद्यनुभवाच्च
बुद्धिरात्मेति वदंति। प्राभाकरतार्किकाव न्योंतरात्मानंदमय इत्यादिश्रुतेः

क्षणिकविज्ञानस्यैवात्मत्वमध्यवसातुं शक्यं। ज्ञानेच्छाप्रयत्नसंस्कारस्मृतीनामेकाश्रयत्वनियमात्तेषां च क्रमिकत्वात्। क्षणिकवि
ज्ञानाश्रयत्वानुपपत्तेः। ज्ञानादीनामेकाश्रयत्वाभावे तु वस्तुनि दृष्टे पूर्वदृष्टसजातीयत्वादिलिंगवशादिष्टसाधनताद्यनुमा।
नपूर्वकं प्रवृत्त्याद्यभावः प्रसज्येत। अन्यदृष्टेऽन्यस्मरणानुपपत्तेः। उक्तं च न्यायकुसुमांजलौ नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपि क्रमा
त् वासनासंक्रमो नास्ति न च गत्यंतरं स्थिरे इति। क्षणिकपक्षे बंधमोक्षयोरपि वैयधिकरण्यमित्यादि बहुदुष्टत्वादनादरणीयः क्षणिक
विज्ञानात्मपक्ष इत्यभिप्रेत्य वेदवादिपक्षमाश्रित्य विज्ञानादप्यंतरमात्मानं निर्दिधारयिषुस्तावत्तत्रापि स्थूलदर्शिमतभेदमाह। प्राभाकरे
त्यादिना। प्राभाकरतार्किकाव ज्ञानमात्मेति वदत इत्यन्वयः। अज्ञानं क्षणिकविज्ञानादन्यत्तदधिकरणं द्रव्यरूपमात्मतत्त्वमिति वदत इत्यर्थः।

विज्ञानमयादप्यंतरे आत्मनि श्रुतिं प्रमाणयति। अन्यों
तरात्मेति। विज्ञानमयाद।

वे॰ सा॰ नंदमयोऽन्य इति यावत् । न चानंदमयः परमात्मेति त्वंपदार्थमध्ये नतस्योदाहरणं युक्तमिति वाच्यं । अन्नमयादिविकारप्रायपठितमयट्श्रु
टी॰ ३५ तिविरोधात् प्रियशिरस्त्वादिवचनविरोधाच्च । एतच्च भाष्यकारैरानंदमयोभ्यासादित्यस्मिन्नधिकरणे निर्णीतं तस्माद्युक्तमेव त्वं
प पदार्थमध्ये आनंदमयस्य तूदाहरणमिति द्रष्टव्यं । सुषुप्तौ बुद्ध्यादीनां ज्ञानसुखदुःखेच्छादीनामज्ञाने ज्ञानभिन्ने आत्मनि लयदर्शना
35 ना दभावदर्शनान्न ज्ञानमात्मेति युक्तिमाह । बुद्ध्यादीनामिति । सर्वज्ञानाभावस्य सुषुप्तौ संप्रतिपन्नत्वात् सुषुप्तिजागरितयोरप्यात्मैकप्र
त्यभिज्ञानान्न ज्ञानमात्मा किं तु तदन्य एवेति भावः । अनुभवमाह । अहमज्ञ इति । अहमज्ञो ज्ञानहीनोऽहं ज्ञानी ज्ञानवानित्यनुभवो
पि ज्ञानात्मनोर्धर्मधर्मिभावेन भेदं दृढयतीत्यर्थः । मतांतरमाह । भाट्ट इति । भाट्टस्त्वज्ञानोपहितं चैतन्यमात्मेति वदतीत्यन्वयः । अ
ज्ञानोपहितत्वमज्ञानसंवलितत्वं ज्ञानाज्ञानरूपत्वं तदपि द्रव्यबोधरूपत्वमिति यावत् । तत्र माडूक्यश्रुतिं प्रमाणयति । प्रज्ञानइति । प्रज्ञा

बुद्ध्यादीनामज्ञाने लयदर्शनादहमज्ञोऽहं ज्ञानीत्याद्यनुभवाच्च न ज्ञानमात्मेति वदतः । भाट्टस्तु प्रज्ञानघन एवानंदमि
दमय इत्यादिश्रुतेः । सुषुप्तौ प्रकाशाप्रकाशसद्भावात् । मामहं न जानामीत्याद्यनुभवाच्चाज्ञानोपहितं चैतन्यमात्मेति

२
नघनः प्रज्ञानैकरसः एवकारेण रसांतरसंबंधं वारयति आनंदमय इत्यानंदप्रचुरो नानंदविकारः प्राचुर्यार्थे मयडंतनिर्देशादीषद ८
नानंदस्वभावतापि द्रष्टव्या शंकृतात्मनि गम्यत इति भावः । युक्तिमाह । सुषुप्ताविति । सुषुप्तौ प्रकाशाभावे सुषुप्तिरमाह्निकोत्ति
सुखमहमस्वाप्समिति सुप्तोत्थितस्य परामर्शो न स्यात् । न तदैंद्रियमनसोर्व्यापारोऽस्ति येन तज्जन्यज्ञाने नापि तत्परामर्शः स्यात् । नाप्य
विद्याप्रकाशिका जडत्वात् परिशेषादात्मैव बोधांशः प्रकाशक इति प्रकाशसद्भावसिद्धिः । न किंचिदवेदिषमिति परामा
र्शादात्मन्येव सुषुप्तावशेषविशेषविज्ञानाभाववत्त्वमपि कल्प्यते अतस्तत्राप्रकाशोद्रव्यांशश्चास्तीति भावः । ननु
सुषुप्तावेवात्मनो ज्ञानरूपत्वेनावस्थांतरे इत्याशंकामनुभवाभिनयेन प्रत्याचष्टे । मामहमिति । अहमित्यात्मनिक राम
नीरिमा समानेपि मां न जानामीत्यनुपसंहत ३५

विशेषस्य तस्यैव कर्मत्वमपि तस्मिन्नेव ज्ञाने भासत इत्यवस्थान्तरेऽपि द्यात्मक आत्मेत्यभिप्रायः। ज्ञानस्यात्मधर्मत्वेऽपि न ततोऽत्यन्तभेद
स्तादात्म्याङ्गीकारात् समवायस्य च समवायिभ्यां सह संबद्धत्वासंबद्धत्वविकल्पासहत्वेनाप्रामाणिकत्वादिति भावः। माध्यमिकमतमु
त्थापयति। अपरो बौद्ध इति। इदं नामरूपात्मकं जगदग्रेऽसृष्टेः प्राक्काले सत् शून्यमेवासीदिति बौद्धाभिप्रायेण श्रुतेरर्थः। युक्तिमाह सुषुप्ताव
िति। तामेव स्वानुभवोपपन्नत्वेन द्रढयति। अहमिति। शून्यमात्मा सर्वाभावरूपो न द्रव्यबोधात्मेति भावः। एवं प्रत्यगात्मत्वाधिष्ठानं मतभेदे
तेप नोपन्यस्तं दूषयितुमारभते। एतेषामिति। तत्र तावत्पूर्वपूर्ववादिमतमुत्तरोत्तरवादिमते न दूषितमिति पुत्रादिशून्यपर्यन्तस्यानात्मत्वं तैरेव वादि दि

अपरो बौद्धोऽसदेवेदमग्र आसीदित्यादिश्रुतेः सुषुप्तौ सर्वाभावादहं सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति
वदति। एतेषां पुत्रादिशून्यपर्यन्तानामनात्मत्वमुच्यते। एतैरिति प्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरोक्तश्रु
तियुक्त्यनुभवाभासैर्बाधदर्शनात्पुत्रादीनामनात्मत्वं स्पष्टमेव। किंच प्रत्यगस्थूलोऽचक्षुरप्राणोऽमनाः अकर्त्ता चैतन्यं चिन्मात्रं सदित्या
दिप्रबलश्रुतिविरोधात्।

भिः स्फुटीकृतमित्याह। एतैरिति। ननु कथं वावदूकविवाददर्शनमात्रेण पुत्रादीनां शून्यपर्यन्तानामनात्मत्वमवधारयितुं शक्यते श्रुतियु
क्त्यनुभवानां प्रत्येकमुपन्यस्तत्वादित्याशंक्य सत्यमुपन्यस्तास्तैः श्रुत्यादयः किंतु ते सर्व एवाभासाः पुत्रादिशून्यपर्यन्तातिरिक्तप्रत्यगात्मस्व
रूपसमर्पकप्रबलश्रुतियुक्त्यनुभवविरोधादित्याह। किंचेति। न केवलं परस्परविगीतत्वादेव पुत्रादीनामनात्मत्वं किंतु प्रबलश्रु
त्यादिभिः पूर्वेषां श्रुत्यादीनां बाधितत्वादपीति योजना। तत्रात्मा वै पुत्रनामासीति श्रुतेः प्रत्यक् श्रुत्या बाधः प्रत्यक्त्वं नाम सर्वान्तरत्वं
स वा एष पुरुषोऽन्नरसमय इति श्रुतेरस्थूलश्रुत्या बाधः। ते ह प्राणाः प्रजापतिमित्यादिश्रुतिसामर्थ्यसिद्धेन्द्रियात्मत्वस्याचक्षुरि
त्यादिना बाधः। अन्योऽन्तर आत्मा प्राणमय अन्योऽन्तर आत्मा मनोमय इत्यनयोरप्राणो मना इत्याभ्यां बाधः। अन्योऽन्तर आत्मा विज्ञा

वे॰ सा॰ व्य॰ टी॰ ३६ न्तमेंद्र इत्यस्याः श्रुतेरकर्तेत्यनेन बाधः। अन्योंतर आत्मानंदमय इत्यस्याः श्रुतेस्तत्त्वमित्यनेन बाधः। प्रज्ञानघन एवानंदमय इत्यस्याश्चि
न्मात्रमित्यनेन बाधः। असदेवेदमित्यस्याः सदित्यनेन बाधः। इति प्रत्येकं योजनीयं। अत्रोदाहृतश्रुतीनामित्थमक्षरविन्या
सः क्रमेण द्रष्टव्यः। कश्चिद्धीरः प्रत्यगात्मानमैक्षत्। अस्थूलमनण्वह्रस्वमदीर्घं। अचक्षुरश्रोत्रं तदपाणिपादं। अप्राणो ह्यम
नाः शुभ्रः। अनंतशक्तात्मा विश्वरूपो ह्यकर्ता। न चास्ति वेत्ता मम मचित्सदाहं। चिन्मात्रोहं सदाशिवः। सदेव सौम्येदमग्र आसी
त्तत्त्वं सत्यमात्मेति। आदिशब्दात् एष त आत्मा सर्वांतरः अशरीरं शरीरेषु प्राणस्य प्राणमुत चक्षुरुत श्रोत्रस्य श्रोत्रं मन्नस्या
मनो ६ न्नं मनसो ये विदुः केन प्राणः प्रथमः प्रैति युक्तः यतो वाचो निवर्तंते अप्राप्य मनसा सह। न करोति न लिप्यते साक्षी चेता केवलो ह
निर्गुणश्च कूटस्थः प्रज्ञानघन एवानंतमनंततो विदुरित्याद्याः श्रुतयः संगृह्यंते। इदमत्रानुसंधेयं पुत्रात्मश्रुतिस्तु देहावलंबिनीतित

अस्य पुत्रादिशून्यपर्यंतस्य जडस्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वात्।

तु ७ स्यागौणार्थत्वं स्पष्टमेव देहप्राणाद्वृति श्रुतिरर्थवादत्वान्न स्वार्थपरा अन्नमयाद्यानंदमयांतश्रुतेर्मुंजादिषीकावत्सर्वांतरत्व
प्रतिपुच्छशब्दवाच्यात्मप्रतिपत्त्युपायार्थत्वेनोपन्यस्तत्वान्न तेषां स्वार्थपरत्वं प्रत्यक्षादीनामसिद्धौ तूपन्यस्तश्रुतिवचना
नां तु वक्ष्यमाणोपक्रमादिलिंगैरात्मयाथात्म्यपरत्वमिति युक्तं प्राबल्यमिति पुत्रादिशून्यपर्यंतं न नित्यं जडत्वाद्घटादिवदनि
त्यस्यात्मा तदनित्यत्वेऽकृताभ्यागमकृतविप्रणाशप्रसंगादतो न पुत्रादीनामात्मत्वमिति युक्तमाह। अस्येति। जडत्वमुपपा
दयति। चैतन्यभास्यत्वेनेति। न चात्मनोऽपि चैतन्यभास्यत्वं कर्मकर्तृभावविरोधात्। कर्तृत्वं हि क्रियां प्रति गुणभावः का
प २ र्मत्वं तु प्राधान्यं। तथा चैकस्यां क्रियायामेकस्यात्मनो युगपद्विरुद्धधर्माश्रयत्वे वैरूप्यप्रसंगः। नापि ज्ञानाश्रयत्वेनात्मनो राम
भानं संभवति। ज्ञानभिन्नस्य ज्ञानकर्मत्वेनैवापरोक्षत्वनियमात्। नापि नित्यानुमेयोऽसंदिग्धत्वात्। नहि कदाचि ३६

दात्मन्यहमस्मि नास्मि वेति संदेहः कस्यचिद्दृश्यते पदिश्यो यात्स्वयं प्रकाश इति न तस्य चैतन्यभास्यता। श्रुतयश्च भवंति स्वप्र
काशसाधिकाः परप्रकाश्यतानुमानविरोधिन्यः। न विज्ञातेर्विज्ञातारं विजानीयाः। विज्ञातारमरे केन विजानीयात्। अन्य
देव तद्विदितादथो अविदितादधि। अयमयं पुरुषः स्वयं ज्योतिः आत्मैवास्य ज्योतिः। अप्राण्यमनसा सहायन्मनसा न मनुते
इत्येवमाद्याः। ननु न चायमात्माणुपरिमाणो वा न। तथा सति सकलशरीरव्यापि चैतन्यानुपलंभप्रसंगात्। नापि देहपरिमा
णः। मध्यमपरिमाणो वा ततः सावयवत्वे नानित्यत्वप्रसंगात्। एवं चात्मा कात्स्न्यमिति न्यायनिरस्तत्वात्। नापि परममहत्प
रिमाणः। उत्क्रांति गत्यागति श्रुतिविरोधात्। अतः किं परिमाणोयं प्रत्यगात्मेति। उच्यते स्वतस्तावदखंडब्रह्मात्मस्वभा
वत्वात्स वा एष महानज आत्मेत्यादि श्रुतेश्च परममहत्परिमाण एव। ब्रह्मात्मस्वभावत्वे चास्य प्रवेश श्रुतिभ्यः तत्सृ
ष्ट्वा तदेवानुप्राविशत् स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत। स एष इह प्रविष्ट आनखाग्रेभ्यः। अनेन जीवेना
विद्द त्मनानुप्रविश्य सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते। एको देवो बहुधा संनिविष्टः। यथा ह्ययं
ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन् उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मा। पुरश्चक्रे
द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्। रूपं रूपं प्रतिरूपो बभूव। अग्निर्यथैको भुवनं प्र
विष्टो रूपं रूपं प्रतिरूपो बभूवेत्येवमादिकाभ्यः क्षेत्रज्ञं चापि मां विद्धि। अहमात्मा गुडाकेश सर्वभूताशयस्थितः। म
मैवांशो जीवलोके जीवभूतः सनातन इत्यादि स्मृतिभ्यश्च। संसारित्वावस्थायामेव तस्योपाधिनिबंधनं परिच्छिन्नपरि
माणं। तच्चयथोपाध्यनुरूपत्वादनियतं तथा च दर्शयति श्रुतिः अंगुष्ठमात्रो रवितुल्यरूपः। आराग्रमात्रो ह्यवरोपि दृष्टः। वाला

वे॰ सा॰ टी॰ ३७

37

यन्नचैवायं नपुंसकः यद्यच्छरीरमादत्ते तेन तेन स युज्यते इत्यादिवचनैः स च प्रतिशरीरमभिन्न एव एको देवो बहुधा संनि
विष्टः। एकं सद्विप्रा बहुधा वदंति। एकं संतं बहुधा कल्पयंति। त्वमेकोसि बहूननुप्रविष्टः। इंद्रस्यात्मानं शतधा चरंतं। एकः स
न्बहुधा विचचार इत्यादिश्रुतिशतेभ्यः। तस्माद्देहेंद्रियप्राणमनोबुद्ध्यव्याकृतविलक्षणस्तत्साक्षी चिद्धातुः सद्रूपः प्रत्यगात्मे
ति निश्चितोर्थः। अनुभवप्राबल्यं दर्शयति। अहमिति। तं न पश्यत्यकृत्स्नो हि सः प्राणन्नेव प्राणो नाम भवतीत्युपक्रम्य प्राणाद्यात्म।
म ४ विज्ञानेहंतस्य विषयतादोषेण निंदितत्वात्तेत्वात्मेत्येवोपासीतात्र ह्येते सर्व एकं भवंतीति हि तत्त्वात्मस्वभावं वेदितव्यं निर्दिश्यते देतत्पदनी
यं ब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासैर्नाबाधितत्वात्तु ज्ञानादिप्रपंचपर्यंतमखिलमनात्मैवात्र त
त्तत्त्वज्ञासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावप्रत्यक्चैतन्यमेवात्मतत्त्वमिति वेदांतविद्वदनुभवः। एवमध्यारोपः। अपवादो
नाम रज्जुविवर्तस्य रज्जुमात्रत्ववत् वस्तुविवर्तस्यावस्तुनोऽज्ञानादिप्रपंचस्य वस्तुमात्रत्वं।

यमस्य सर्वस्य यदयमात्मेति तदतिरिक्तस्य ज्ञातव्यस्यानवशेषं दर्शयंती श्रुतिः तद्विज्ञानवत एव विदुषां सूचयति। तथोत्तरत्रापि तदाहुर्यद्ब्रह्म
विद्यया सर्वं भविष्यंतो मनुष्या मन्यंते किमु तद्ब्रह्मावेदित्याक्षिप्य तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवदिति च विद्वद
नुभवत्वं ब्रह्मात्मज्ञानस्य दर्शयति। अतो हेतोः चक्षुरादिषु प्रत्यगात्मत्वाभिमानो भ्रांतिरिति भावः। प्रत्यगात्मविषयाध्यारोपमुप
संहरति। अत इति। वेदांतविद्वदनुभव इति विशेषणेन मतांतरेनुभवस्य मूलप्रमाणशैथिल्यं सूचयति अध्यारोपप्रकरणमुप
संहरति। एवमिति। एवमध्यारोपं सप्रपंचं निरूप्यापवादमिदानीं निरूपयिष्यंस्तल्लक्षणमाह। अपवादो नामेति। कार्यस्य राम
कारणमात्रसत्ता ३७

वप्रोष्णं कारणस्वरूपव्यतिरेकेण कार्यस्यासत्तावधारणं वाऽपवाद इत्युक्तं एवं लक्षणोपवादः केन क्रमेणेत्यपेक्षायां विपर्यये
ण तु क्रमोतऽउपपद्यते चेति न्यायमाश्रित्योत्पत्तिक्रमवैपरीत्येनापवादं क्रमेण दर्शयति। तथाहीत्यादिना। एतद्भोगायतनमिति। प्रत्य
दो सिद्धं चतुर्विधभूतग्रामचरमकार्यमंगुल्या निर्दिशति द्वितीय एतच्छब्दोन्नादिविषयः अन्नादिशब्दस्यान्नादिसंग्रहार्थः भूरादि चा
तुर्दशभुवनानि तृतीये तच्छब्दार्थः। एतत्सर्वमित्यत्रैतच्छब्द उक्तसमस्तसंग्रहार्थः एतेषामित्यस्यापि स एवार्थः। उत्पत्तिव्युत्क्रमेणे
त्यस्यायमर्थः पृथिवी गंधतन्मात्रात्मिका रसतन्मात्रात्मकाप्मात्रं भवति। आपश्च रूपतन्मात्रात्मकतेजोमात्रं भवं। तच्च तेजः स्पर्शत ति

तथाहि एतद्भोगायतनं चतुर्विधसकलशरीरजातं भोग्यरूपान्नादिकमेतदाश्रयभूरादिचतुर्दशभुवनान्येतदाश्रयभूतं ब्रह्मांडं
चैतत्सर्वमेतेषां कारणभूतपंचीकृतभूतमात्रं भवति। एतानि शब्दादिविषयसहितानि पंचीकृतभूतानि सूक्ष्मशरीरजा
भूत तं चैतत्सर्वमेतेषां कारणरूपाऽपंचीकृतमात्रं भवति। एतानि सत्त्वादिगुणसहितान्यपंचीकृतान्युत्पत्तिव्युत्क्रमेणैतत
त्कारणभूताज्ञानोपहितचैतन्यमात्रं भवति। एतदपि तत्सर्वमज्ञानोपहितं चैतन्यं चेश्वरादिकमेतदाधारभूतानुपहित
चैतन्यतुरीयब्रह्ममात्रं भवति। आभ्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं भवति।

न्मात्रात्मकवायुमात्रं भवति स च वायुः शब्दतन्मात्रात्मकाकाशमात्रं भवति स चाकाशः स्वकारणभूताज्ञानोपहितचैतन्यमात्रं।
भवति इति। एतदाधारेत्यत्रैतच्छब्दोऽज्ञानतदुपहितचैतन्यविषयः एतदाधारभूतेत्यादिब्रह्मान्तानां पदानां कर्मधारयः तथा च
स्मृतिश्रुती भवतः। जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते। ज्योतिष्यापः प्रलीयंते ज्योतिर्वायौ प्रलीयते वायुश्च लीयते व्यो।
म्नि तच्चाव्यक्ते प्रलीयते अव्यक्तं पुरुषे ब्रह्मन् निष्कले संप्रलीयत इति। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति चा।
ध्यारोपापवादनिरूपणोफलितमाहाभ्यामिति। ब्रह्मात्मचैतन्यस्याद्वितीयप्रत्यग्रूपतानिरूपणार्थत्वादध्यारोपादिप्रपंच

वे॰ सा॰
टी॰ ३८

38

न स्वपदार्थशुद्धिरवांतरफलमिति सूचयितुं पदार्थशोधनमपीत्युक्तं। तत्त्वंपदयोः प्रत्येकं द्विविधोऽर्थो वाच्यो लक्ष्यश्चेति तदुभयं विभज्य दर्शय
ति। तथाहीत्यादिना। समष्ट्यज्ञानं तदुपहितं ईश्वरस्तदुभयाश्रयमनुपहितं स्वमहिमनि प्रतिष्ठितं मद्वरशब्दवाच्यं चिन्मात्रमित्येत
त्रयं तप्तायःपिंडवदविविक्तं तत्पदवाच्यार्थ इत्यर्थः। आदिपदात्समष्टिहिरण्यगर्भविराजौ गृह्येते तेन अज्ञानादिव्यष्टिरित्यत्रा
दिपदात्सूक्ष्मशरीरं स्थूलशरीरं च गृह्यते। एतदनुपहितं प्रत्यक्चितिमात्रं शेषं पूर्ववत्। उभयत्रापि यथायोगमध्याहृत्य समष्टिस्वप्न व४

तथाहि अज्ञानादिसमष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टचैतन्यमेतदनुपहितं चैतन्यं त्रयं तप्तायःपिंडवदेकत्वावभास
मानं तत्पदवाच्यार्थो भवति। एतदुपाध्युपहिताधारभूतमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति। अज्ञानादिव्यष्टि
रेतदुपहितात्पज्ञत्वादिविशिष्टचैतन्यमेतदनुपहितं चैतन्यं त्रयं तप्तायःपिंडवदेकत्वेनावभासमानं त्वंपदवाच्योऽर्थो
भवति। एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानंदं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भवति। अथ महावाक्यार्थो
वर्ण्यते। इदं तत्त्वमसि इति वाक्यं संबंधत्रयेणाखंडार्थबोधकं भवति। संबंधत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयो नार
र्विशेषणविशेष्यभावः प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणभावश्चेति। तदुक्तं सामानाधिकरण्यं विशेषणविशेष्य
तालक्ष्यलक्षणसंबंधः पदार्थप्रत्यगात्मनामिति॥

जागरोसुषुप्तिव्यष्टिस्वप्नजागरो चैत्ये वमवस्थात्रययुक्तमिति योजयितव्यं। अ
ज्ञानतत्कार्यसमस्तप्रपंचेषु सत्तास्फूर्तिप्रदत्वेनानुस्यूतं चित्सदानंदाद्वयात्मकं वस्तु तत्पदलक्ष्यार्थः। देहेंद्रियमनोबुद्धिप्राण
हंकृतितद्धर्मजाग्रत्स्वप्नसुषुप्त्यवस्थाभ्यो विलक्षणं तत्साक्षी चिद्धातुस्त्वंपदलक्ष्यार्थ इत्याह। एतदुपाध्युपहितेति। पदार्थप्र
तिपत्तिपूर्विकत्वाद्वाक्यार्थप्रतिपत्तेरादावध्यारोपापवादाभ्यामवांतरवाक्याविष्टंभेन पदार्थौ परिशोध्येदानीं महावाक्या
र्थं निरूपयितुमुपक्रमते। अथेति। वाक्याद्वाक्यार्थप्रतिपत्तिक्रममादौ संगृह्णाति। इदमिति। संबंधत्रयं नामेति। उक्तविभागेनैकमप्य ३८
गे।

सिद्धवचनं संवादयतीति। तदुक्तमिति।

भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे तात्पर्यसंबंधः सामानाधिकरण्यमिति सामानाधिकरण्यलक्षणमभिप्रेत्य तत।
स्योदाहरणं तत्त्वंपदयोरनुवर्त्तयति। सामानाधिकरण्यसंबंधस्तावदिति। तत्कालोऽतीतकालः एतत्कालो वर्त्तमानका।
लः प॥ रोक्षत्वादीत्यादिशब्दान्नियतत्वादिग्रहः। अपरोक्षत्वादीत्यादिपदान्नियम्यत्वादिग्रहः व्यवच्छेदकं विशेषणं व्यवच्छे
द्यं विशेष्यं तयोर्भावो विशेषणविशेष्यभावः स एव संबंधः संबंधवदुभयनिरूपणीयत्वादित्यभिप्रेत्य विशेषणविशेष्यभावसं
बंधस्य दृष्टांतमाह। विशेषणेति। सोऽयंपदार्थयोर्मध्ये कस्य वा विशेषणता कस्य वा विशेष्यता किं तत्र विशेषणकृत्यमित्यपेक्षायां द्वयो

सामानाधिकरण्यसंबंधस्तावत् यथा सोऽयं देवदत्त इति वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्यैतत्कालविशि
ष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन्पिंडे तात्पर्यसंबंधः तथा तत्त्वमसीति वाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकत
त्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वंपदस्य चैकस्मिंश्चैतन्ये तात्पर्यसंबंधः। विशेषणविशेष्यभावसंबंधस्तु यथा
तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थैतत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्त्तकतया वि
शेषणविशेष्यभावः तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्यो
न्यभेदव्यावर्त्तकतया विशेषणविशेष्यभावः। लक्ष्यलक्षणसंबंधस्तु॥

रपि पदार्थयोः परस्परमपेक्षया विशेषणविशेष्यभावो।
भेदभ्रमापोहकत्वं विशेषणकृत्यमित्यभिप्रेत्याह। अन्योन्यभेदव्यावर्त्तकतयेति। अभिधेयाविनाभूतप्रवृत्तिर्लक्षणा सा त्रिविधा जहल्ल।
क्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति। वाच्यार्थमशेषतः परित्यज्य तत्संबंधिन्यर्थांतरे वृत्तिर्जहल्लक्षणा। वाच्यार्थापरि
त्यागेन तत्संबंधिनि वृत्तिरजहल्लक्षणा। वाच्यार्थैकदेशपरित्यागेनैकदेशवृत्तिर्जहदजहल्लक्षणा। तत्र प्रकृतवाक्ये लक्ष्यलक्षणसंबं
धं सोदाहरणमाह। लक्ष्यलक्षणसंबंध इति।

पदवाच्यार्थयोः परस्परविरुद्धत्वान्नान्योन्यविशेषणविशेष्यभावउपपद्यते तथाच तत्समर्पकयोरपि पदयोः सामानाधिकरण्यं च प्र
तीयमानस्यैकवाक्यार्थस्यानुपपत्तिरिति लक्षणयात्र सक्तायां वक्ष्यमाणप्रकारेण जहदजहल्लक्षणयोः प्रकृतासंगतौ पदवा-
च्यगतविरुद्धांशग्रहणेनाविरुद्धांशलक्षणया सामानाधिकरण्ये सति वाक्यादखंडार्थप्रतिपत्तिरिति भावः। अंशांतरपरित्यागे
नांशांतरलक्षणायाः शास्त्रप्रसिद्धां संज्ञां संगिरते। इयमेवेति। जहदजहल्लक्षणेदं शब्दार्थः। अयंभावः तत्त्वंपदयोः सामाना-
धिकरण्यं पतावच्छ्रूयते न तत्त्वयोर्भिन्नार्थत्वे संभवति स्तंभकुंभयोस्तदृदर्शनात्। नाप्येकार्थाभिधायकत्वेन वैयर्थ्यदेव्यासिद्धेति

यथा तत्रैशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तपिंडेन सह लक्ष्य
लक्षणभावसंबंधः तथात्रापि वाक्येन तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वांशपरित्यागे-
नाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः। इयमेव भागलक्षणेत्युच्यते। अस्मिन्वाक्ये नीलोत्पलवाक्यवद्वा-
क्यार्थो न संगच्छते। तत्र तु नीलपदार्थनीलगुणस्य उत्पलपदार्थोत्पलद्रव्यस्य शौक्ल्यपटादिव्यावर्तकतयाऽन्योन्यविशे-
षणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य वा तदैक्यस्य वा वाक्यार्थत्वांगीकारे प्रत्यक्षादिप्रमाणांतरविरोधाभावा-

वत्तद्धितादेरैकार्थ्यसमर्थकस्य कारणस्येहादर्शनात्। तथाहुः आग्निद्रां देवतायुक्तां वदत्येवैयतद्धितः आग्निद्रापदसांनिध्यात्तस्यै-
वविषयार्पणमिति। परिशेषादेकार्थ्यलक्षकत्वेनैवेति। ननु तत्त्वंपदयोः सामानाधिकरण्यं विनापि लक्षणयैकार्थ्यमुपपत्स्यते नीलमुत्प-
लमितिवदित्याशंक्याह। अस्मिन्निति। अखंडार्थत्वस्य विवक्षितत्वादित्यभिसंधिः। ननु नीलोत्पलवाक्येऽपि स्यादखंडार्थता नेत्याह त
त्रेति। शौक्ल्यादिव्यावर्तकनीलगुणस्य पटादिव्यावर्तकोत्पलद्रव्यस्य च गुणगुणिभावेन विरोधाभावात्तत्संसर्गैक्यस्य वा तदन्यतर ३९
विशिष्टस्यान्यतरस्य वा वाक्यार्थत्वान्नाखंडार्थत्वमुख्यैक्यस्य तत्राविवक्षितत्वादित्यर्थः॥ रामरामरामरामरामरामरामरामरामः

प्रकृतवाक्ये नीलोत्पलवाक्यादिवैषम्यमाह। अन्वितेति। यद्यपि तत्त्वंपदार्थयोः स्वरूपतो न प्रत्यक्षत्वं तत्पदार्थस्यासिद्धत्वात्
त्वंपदार्थस्य च द्रष्टृत्वात् तद्दृश्यत्वानुपपत्तेस्तथा च तद्भेदस्याप्यप्रत्यक्षता तथापि तत्त्वंपदयोः परोक्षापरोक्षार्थाभिसंगतयोः श्रवणसम परोक्षा
येऽपरिशोधितपदार्थस्य पुंसो भवति विरोधस्फूर्त्तिरिति तदपेक्षया प्रत्यक्षादिप्रमाणविरोधादित्युक्तं तथा च तत्त्वंपदयोः श्रव
णांशे व्युत्पन्नयोर्विरुद्धार्थविषयकत्वेनैक्यानिष्ठत्वाभावान्न विवक्षितसामानाधिकरण्यमुपपद्यत इति भावः। एतदु
क्तं भवति न तावत्तत्त्वमर्थयोर्नीलोत्पलवद्गुणगुणिभावः उभयोरपि द्रव्यत्वात्। नापि कुंडलसुवर्णवत्कार्यकारणभावो।

अत्र तु तदर्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्त्तकतया विशेष
णविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य च तदैक्यस्य वाक्यार्थत्वांगीकारे प्रत्यक्षादिप्रमाणांतरविरोधाद्वाक्यार्थो का
न संगच्छते। अत्र तु गंगायां घोषः प्रतिवसतीति वाक्यवज्जहल्लक्षणा न संगच्छते।

नित्यत्वादविकृतत्वाच्च। नापि भूमसूर्यरश्म्यादिवदंशांशिभावो निरवयवत्वात्। नापि क्रियातद्भावो गगनादिवन्निष्क्रियत्वात्। ना
पि गोत्वशाबलेयादिवज्जातिव्यक्तिभावो द्रव्यत्वादेव अत एव न विशेषणविशेष्यभावोऽपि। वस्तुतस्तु विज्ञानघनमात्र
त्वावधारणान्नेति नेति अशेषविशेषप्रत्याख्यानेन निर्धर्मकत्वावधारणाच्च। न केनापि प्रकारेण तत्त्वमादिवाक्यानां
संसर्गार्थे निष्ठत्वशंकावकाशं लभते। न चेदं वाक्यं त्वमिंद्रोसीतिवत् स्तुतिपरं नह्युक्तोऽभ्यासवैयर्थ्यप्रसंगात्। न हि व३
स्तुतिः पुनः पुनः परिचोदनापूर्वकं क्वचिदभ्यस्यते। अत एव नार्थवादः अनन्यशेषत्वाच्च न ह्यस्मिन्प्रकरणेऽन्यत्किं
चित्प्रधानवाक्यमुपलभ्यते। तच्छेषत्वेनेदमर्थवादरूपं भवेत्। नापि राजपुरुषे राजायमिव उपचारिकं। अप्रमित।

वे॰ सा॰
५०
40

भेदयोरैक्यस्योपचारिकत्वानुपपत्तेः। नापि विपर्ययः संशयो वा संभवति श्रुतेः स्वतः प्रामाण्यात् तस्मात् तत्त्वमस्यादिवाक्यम
खण्डार्थनिष्ठम् कार्यकारणद्रव्यमात्रनिष्ठत्वे सति समानाधिकरणवाक्यत्वात् सोयं देवदत्त इति वाक्यवदिति। तदेवं पदयोरखण्डा
र्थनिष्ठत्वेन सामानाधिकरण्यं वाच्यार्थयोर्विरोधात् विना लक्षणां न संगच्छत इत्युक्तं तत्र भागलक्षणामेव परिशेषयितुं लक्ष
णांतरं व्युदस्यति। अत्रेत्यादिना। घोषस्याभीरनिवासः कुत इत्यपेक्षायां गंगापदे जहल्लक्षणा संभवति। वाच्यार्थस्य तत्राप्र

अत्र गंगाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वाद्वाक्यार्थमशेषतः परित्यज्य तत्संबंधितीरल
क्षणाया युक्तत्वाज्जहल्लक्षणा संगच्छते। अत्र तु परोक्षत्वापरोक्षत्वविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य भाग
मात्रे विरोधाद्भागांतरमपि परित्यज्यान्यलक्षणाया अयुक्तत्वाज्जहल्लक्षणा न संगच्छते। न च गंगापदं स्वार्थपरित्या
गेन यथा तीरपदार्थं लक्षयति तथा तत्पदं त्वंपदं वा स्वार्थपरित्यागेन तत्पदार्थं त्वंपदार्थं वा लक्षयतु अतः कुतो जहल्लक्ष
णा न संगच्छत इति वाच्यं। तत्र तीरपदाश्रवणेन तदर्थप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वंपदयोः श्रूयमाणत्वे। तौ
न तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाया अभावात्।

यस्मान्नन्वये न परित्याज्यत्वादित्याह। अत्र गंगाघोषयोरिति प्रकृते वाच्यस्यार्थस्याशेषपरित्यागायोगान्न जहल्लक्षणा सं
गच्छत इत्याह। अत्रेत्विति। ननु विशेषणांशत्यागेपि विशेषणाभावे विशिष्टाभावन्याये न विशिष्टस्वार्थपरित्यागाज्जह
ल्लक्षणैव तत्त्वंपदयोरपि गंगापदवत्स्यादित्याशंक्य वैषम्येण प्रत्याचष्टे। न चेति। यथा पदादेव वाक्यार्थान्वयिपदार्थ
प्रतीतौ लक्षणा वैयर्थ्यं तथा विशेष्यांशापरित्यागेपि लक्षणा वैयर्थ्यं तत्त्वंपदार्थातिरिक्तस्य तत्संबंधिनो वाक्यार्थान्वयिनो। ५०

र्थस्याप्रसिद्धेरिति भावः। अजहत्स्वार्थामप्युदाहरति। अत्र शोण इति। शोणपदे स्ववाच्यशोणगुणापरित्यागेन तदा
धारे लक्षणावत्तत्पदे त्वंपदे च स्ववाच्यापरित्यागेन तत्संबन्धिनो यस्य कस्यचिदनिर्दिष्टविशेषस्यार्थान्तरस्य प्रतीत्यै
लक्षणांगीकरणेऽपि वाच्यार्थयोर्विरोधस्यापरिहारान्नाजहल्लक्षणोपपद्यत इत्यर्थः। प्रकारांतरेणाजहल्लक्षणामुदाहरति

अत्र शोणो धावतीति वाक्यवदजहल्लक्षणापि न संभवति शोणगुणगमनलक्षणस्य वाक्यार्थविरुद्धत्वात्तदपरित्यागेन
तदाश्रयाश्वादिलक्षणायां तद्विरोधपरिहारसंभवादजहल्लक्षणा संभवति। अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचै
८३ तन्यैकत्वलक्षणवाक्यार्थस्य विरुद्धत्वात्तत्परित्यागे न तत्संबन्धिनो यस्य कस्यचिदर्थस्य लक्षितत्वेऽपि तद्विरोधापरिहारा
दजहल्लक्षणापि न संभवत्येव। न च तत्पदं त्वंपदं वा स्वार्थविरुद्धांशपरित्यागेनांशांतरसहितं तत्पदार्थं त्वंपदार्थं वा
लक्षयतु अतः कथं प्रकारांतरेण भागलक्षणांगीकरणमिति वाच्यं। एकेन पदेन स्वार्थांशपदार्थांतरोभयलक्षणाया असं
भवात्। पदांतरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षाभावाच्च। तस्माद्यथा सोऽयं देवदत्त इति वाक्यं तदर्थो वा
तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धं तत्कालैतत्कालविशिष्टांशं परित्यज्याऽवि
त्यो द्वा२ रुद्धं देवदत्तांशमात्रं लक्षयति तथा तत्त्वमसीति वाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे
विरोधाद्विरुद्धं परोक्षत्वापरोक्षत्वविशिष्टांशं परित्यज्याविरुद्धं चैतन्यमात्रं लक्षयतीति।)

निराचष्टे न चेति। सह कृत्वा तस्यैकस्य प
दस्य युगपदुभयलक्षकत्वासंभवादित्यर्थः। अत्रापि पूर्वोक्तं दूषणं प्रसंजयति। पदांतरेति। परिशेषाद्भागलक्षणामतेन नाखंडवाक्यार्थसि
द्धिरस्तीत्येवं लक्षणयैकार्थपर्यवसायित्वेन पदयोः सामानाधिकरण्यमित्युपसंहरति। तस्मादिति। सोऽयमिति पदद्वयवाक्यशब्दा
र्थः देवदत्तपदस्य सामानाधिकरण्यसिद्धैक्यस्य स्पष्टीकरणार्थत्वात् लक्षणाविचारानुपयोगात्। यद्यपि पदधर्मो लक्षणा तथापि अ

भिहितान्वयमतत्वपदार्थस्यापि लक्षकत्वमभ्युपगम्य पदार्थौ विवेक्तुमुक्तं अन्यत्समानं। अत्र केचिदाहुः पदद्वये लक्षणानुपपन्ना सोऽयं देवदत्त इत्य
त्र सशब्दो नातीतदेशकालपरित्यागेन लक्षितदेवदत्तस्वरूपे वर्त्तमानदेशकालवैशिष्ट्यमयं पदेन प्रतिपाद्यते तथा च पूर्वोत्तरदेवदत्तु स्व
रूपाऽभेदसिद्धेरिति तदयुक्तं विशिष्टस्य केवलाद्भिन्नत्वात् यथा केवलो विशिष्टाद्भिन्नस्तथा विशिष्टोऽपि केवलाद्भिन्न एवं तथा च विशिष्ट
विषयस्यायं शब्दस्यापि विना लक्षणं न स्वरूपनिष्ठत्वं भवति तदभावे च न सोऽयं पदयोः सामानाधिकरण्येन देवदत्तैक्यप्रतिपादक
ता त्वसामंतांवता। अपरे पुनराहुर्न पदवाच्यार्थयोः परस्परविरोधाल्लक्षणाश्रीयते किंतु वाच्यार्थैक्ये तात्पर्याभावादिति तन्न। तात्पर्या
भावावगमस्यापि विरोधस्फूर्त्यधीनत्वात्। अन्यथा वेदवाक्यप्रतिपादितेर्थे संवादिविसंवादिप्रमाणांतराविषये तात्पर्यानवगमायोगात्
तस्मात्सूक्तं वाक्यार्थस्यांशे विरोधादिति। तदेवमात्मेति तूपगच्छेति ग्राहयेति चेति न्यायेन जीवस्य नित्यशुद्धबुद्धमुक्तसत्यज्ञानानंतानं

अथाधुनाऽहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्यते। एवमाचार्येणाध्यारोपापवादपुरःसरं तत्त्वंपदार्थौ शोधयित्वा वाक्ये
नाखंडार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानंदाद्वयं ब्रह्मास्मीत्यखंडाकाराकारिता चित्तवृत्तिरु

दपरिपूर्णब्रह्मात्मत्वोपदेशवाक्यार्थमप्रपंचं निरूप्येदानीमवगतस्वरूपस्यानुभवावभासिवाक्यार्थं वर्णयितुमुपक्रमते। अथेति। उप
देशवाक्यार्थनिरूपणानंतर्यमथशब्दार्थः। अधिकारिणो विधिवदधीतवेदेत्यादिखंडलोक्तलक्षणस्य असंभावनाविपरीतभा
वनारहितचित्तदोषरहितस्याध्यारोपादिन्यायेनाचार्योपदेशसमनंतरमेव नित्यशुद्धबुद्धत्वादिविशेषणं ब्रह्माहमस्मीत्यखंडाकारा।
तःकरणवृत्तिरुदेति साक्षात्काररूपा न पुनः परोक्षार्थाकारितेत्यर्थः। न च शब्दस्य परोक्षज्ञानजनकत्वस्वाभाव्यान्नतेनापरोक्षावि
त्तवृत्तिरुदेतीति वाच्यं यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतर इति श्रुतेर्नित्यापरोक्षब्रह्मात्मस्वरूपे तस्मिन्नपरोक्षज्ञानजना ५१
यतः शब्दस्याप्रामाण्यापत्तेः। किंच ज्ञानस्य परोक्षत्वापरोक्षत्वे न करणनिबंधने किंत्वर्थनिबंधने एकस्यैव मनसः सुखादिविषय

कापरोक्षत्वज्ञानहेतुत्वस्यातीतार्थस्मृतिहेतुत्वस्य च दर्शनात्। तत्र सहकारिभेदात् तथाभाव इति चेत् तर्हीहाप्यस्ति सहकारिभेदः
:शब्दप्रतिपत्तुः शाब्दार्थनैकट्यलक्षणः निकटस्थत्वं तमात्मनः स्वरूपं ब्रह्म न तत्त्वस्वरूपमुपाध्यं तथावि[illegible]दृष्टिं द्रव्यसगुणादिरूपात।
स्मात् दशमस्त्वमसीत्यादिवाक्यवत्तत्त्वमस्यादिवाक्यानामपरोक्षज्ञानजनकत्वं युक्तमिति भावः। एवमुत्पन्नाखंडाकाराचित्तवृत्तिः।
किं करोतीति तदाह। तामिति। वृत्तेर्जडत्वादज्ञानबाधनासंभवमाशंक्य तां विशिनष्टि। चित्प्रतिबिंबसहितामसतीति। प्रत्यक्चिति व्याप्तेति या
वत्। ब्रह्मणो विषयीकरणं नाम वृत्तेस्तदभिमुख्यं। ब्रह्मशब्दस्य कार्यब्रह्मविषयत्वं व्यावर्तयति। परमिति। तस्य प्रमेयत्वमाह। अज्ञातमि

सा तु चित्प्रतिबिंबसहिता सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते यथा पटकारणतंतुदाहे पटदाहवदखिल
कार्यकारणेऽज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधितत्वात् तदंतर्भूताखंडाकाराकारिता चित्तवृत्तिरपि बाधिता भवति।
तत्र प्रतिबिंबितं चैतन्यमपि यथा दीपप्रभा आदित्यप्रभाऽवभासनासमर्था सती तयाभिभूता भवति तथा स्वयंप्रकाशमानप्रत्यगभि
न्नपरब्रह्मावभासनाऽनर्हतया तेनाभिभूतं सत् स्वोपाधिभूताखंडवृत्तेर्बाधितत्वात् दर्पणाभावे मुखप्रतिबिंबस्य मुखमात्रत्ववत्प्रत्यग व
भिन्नपरब्रह्ममात्रं भवति।

ति। तस्यास्तादवस्थ्यं वारयति। प्रत्यगभिन्नमिति। अज्ञानमेव बाधत इत्येवकारेण ब्रह्मणः प्रकाश्यत्वं व्यावर्त्यते। ए
वंविधया चित्तवृत्त्या संसारमूलाज्ञाने बाधिते सत्यप्यस्या वृत्तेर्बाधकाभावान्मोक्षोऽपि सप्रपंचः स्यादित्यत आह। तदिति। वृत्तेर्बाधकाभा
वेऽपि दग्धेंधनानलवत्स्वयमेव विनश्यति ततो न सप्रपंचो मोक्ष इत्यर्थः। तर्हि वृत्तिप्रतिबिंबितचैतन्यस्य का गतिरिति तामाह। तत्रेति
। तत्र प्रतिबिंबितं चैतन्यमपि अखंडचित्तवृत्तेर्बाधितत्वात्प्रत्यगभिन्नपरब्रह्ममात्रं भवतीत्यन्वयः। स्वोपाधिविलये उपाहितस्य स्वा
रूपमात्रावस्थाने दृष्टांतो दर्पणाभाव इति। उपाध्यननुगामिनो निरुपाधिप्रकाशनासामर्थ्ये दृष्टांतमाह। यथा दीपप्रभेति। या

वे॰ सा॰
४२
४२

द्यापरिछिन्नप्रकाशस्यापरिछिन्नानवभासने दृष्टांतो यथादीपेति। वाक्यजनिता ब्रह्मात्माकाराचित्तवृत्तिस्तद्गताज्ञानमेव बाधते न तु त- श्री २
त्प्रकाशयतीति विशेषनिरूपणे फलितमाह। एवं चेति। अविरोधः सिद्ध इति शेषः। तत्रैवशब्दसूचितमर्थं हेतुमाह। वृत्तिव्याप्यत्वेति। विशिष्टं ब्रह्मा-
दिप्रमाणबलात्तद्विषयाकारधीसमुन्मेषाभिव्यक्तत्वं वृत्तिव्याप्यत्वं बाह्येंद्रियसन्निकृष्टार्थाकारबाह्यधीपरिणामावछिन्नचिदंशकृ-
तप्राकट्याश्रयत्वं फलव्याप्यत्वमिति भेदः। उक्तेर्थे वृद्धसंमतिमाह। फलव्याप्यत्वमिति। फलव्याप्यत्वाभावे संमत्यंतरेण साधयति। स्वयंप्र-

एवं च सति मनसैवानुद्रष्टव्यं यन्मनसा न मनुते इत्यनयोः श्रुत्योरविरोधः। वृत्तिव्याप्यत्वांगीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपाद-
नात्। तदुक्तं फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षितेति। स्वयंप्रकाशमानत्वान्नाभास उ-
पयुज्यत इति। जडपदार्थाकाराकारितचित्तवृत्तेर्विशेषोस्ति। तथाह्ययं घट इति घटाकाराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य त-
द्गताज्ञाननिरसनपुरःसरं स्वगतचिदाभासेन जडं घटमपि भासयति। तदुक्तं बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटं। तत्राज्ञानं
धिया नश्येत् चिदाभासेन घटः स्फुरेत्। यथा दीपप्रभामंडलमंधकारगतं घटपटादिकं विषयीकृत्य तद्गतांधकारनिरसनपुरःस-
रं स्वप्रभया तदपि भासयतीति। एवंभूतस्वस्वरूपचैतन्यसाक्षात्कारपर्यंतं श्रवणमनननिदिध्यासनसमाध्यनुष्ठानस्यापेक्षित-

काशेति। ननु ब्रह्म फलव्याप्यं स्वाभासांतःकरणव्यंग्यत्वात् प्रत्यक्षत्वाद्वा घटादिवत्। यद्वा ब्रह्माकारवृत्तिः सकर्मिकाऽपरोक्षवृत्तित्वाद्घ-
टादिवृत्तिवदित्याशंक्य पूर्वस्मिन्ननुमाने जडत्वमुपाधिरुत्तरस्मिंस्तु जडविषयत्वमुपाधिरित्यभिप्रेत्याह। जडपदार्थेति। प्रति-
ज्ञातमर्थं सदृष्टांतमुपपादयति। तथाहीत्यादिना। इति शब्दोऽनुभववाक्यार्थनिरूपणसमाप्त्यर्थः। इदानीमावृत्तिरसकृदुपदेशा-
दिति न्यायमाश्रित्यैवंविधसाक्षात्काररूपानुभवदार्ढ्यपर्यंतमनुष्ठेयं श्रवणादिसाधनजातं निरूपयितुमारभते। एवमित्यादिना। ४२

तथाचश्रुतिः तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पांडित्यं च निर्विद्याथ मुनिरिति पांडित्य बाल्य मुनिशब्दैः क्र
मेण श्रवणमनननिदिध्यासनानि विधत्ते। तथा तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चांते विश्वमायानिवृत्तिरिति श्वेताश्वतरीयो
मंत्रः समाधिमप्यनुष्ठेयं सूचयति। सहकार्यंतरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवदिति न्यायेनायमर्थो निर्णीतः। श्रवणादी
नां लक्षणमाह। श्रवणंनामेत्यादिना। गति सामान्यादिति न्यायमाश्रित्याशेषवेदांतानामित्युक्तं। नस्थानतोपि परस्योभयलिंगं स

श्रवणंनाम षड्विधलिंगैरशेषवेदांतानामद्वितीये वस्तुनि तात्पर्यावधारणं। लिंगानि तु उपक्रमोपसंहाराभ्यासाऽपूर्वताफलार्थवा
दोपपत्त्याख्यानि। प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यंतयोरुपपादनमुपक्रमोपसंहारौ। यथा छांदोग्ये षष्ठेध्याये
प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन एकमेवाद्वितीयं ब्रह्मेत्यादावैतदात्म्यमिदं सर्वमित्यंते च प्रतिपादनं। प्रकरणप्रति
ती ४ पाद्यस्य वस्तुनस्तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः। यथा तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनं। प्रकर
णप्रतिपाद्यस्यार्थस्य प्रमाणांतरेणाविषयीकरणमपूर्वत्वं यथा तत्रैवाद्वितीयवस्तुनो मानांतरेणाविषयीकरणं। फलं तु प्रकरणप्रति
पाद्यात्मज्ञानस्य तदनुष्ठानस्य च तत्र तत्र श्रूयमाणं प्रयोजनं यथा तत्राचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संप
त्स्य इति। अद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते। प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः यथा तत्रैवोत तमादेशमप्राक्ष्यो येनाश्रु
तं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुप्रशंसनं।

वेत्रहीति न्यायमाश्रित्याद्वितीये वस्तुनीत्युक्तं। लिंगानि कानीत्यपेक्षा
यां तानि विभजते। लिंगानि त्विति। उपक्रमोपसंहाराख्यमाद्यं लिंगं लक्षयित्वोदाहरति। यथा छांदोग्य इति। पुनःपुनरित्यस्य भावः पौ
नःपुन्यं। तत्रैव छांदोग्य षष्ठे। मानांतराविषयीकरणं आचार्यवान्पुरुषो वेदेति सूचितमिति शेषः। तदनुष्ठानस्य चेति सगुण
विद्याभिप्रायेणोक्तं। आचार्यवान्पुरुषो वेदेति साहचर्यादिहोदाहृतं न पुनः फलवचनं तदा तस्य तावदिति तु फलवचनमिहो

दाहरणमिति द्रष्टव्यं। उदाहरणांतरं स्पष्टार्थं तथा च न्यायो वाचारंभणश्रुते रुपपत्तिपरत्वनिर्णये परस्तदनन्यत्वमारंभणशा
ब्दादिभ्य इति। एवं प्रारव्धान्तरेष्वप्युपक्रमोपसंहारादि निरूपणीयं तथा हि बृहदारण्यके तावत् आत्मेत्येवोपासीतात्र ह्येते
सर्व एकं भवंतीत्युपक्रमः पूर्णमद इति उपसंहारः स एष नेति नेत्यात्मेत्यभ्यासः तं त्वौपनिषदं पुरुषं पृच्छामीत्यपूर्वत्वं स एष वि
ते अभयं वै जनक प्राप्तोसि ब्रह्मैव सन्ब्रह्माप्येतीत्यादि फलं तद्यो यो देवानामित्याद्यर्थवादः स यथा दुंदुभेरित्याद्युपपत्ति
: तथा तैत्तिरीये ब्रह्मविदाप्नोति परमित्युपक्रमः। आनंदो ब्रह्मेति व्यजानादित्युपसंहारः। स यश्चायमित्यभ्यासः। यो वेद नि
हितं गुहायामित्यपूर्वता सूचनं। अभयं प्रतिष्ठां विंदते। अथ सोऽभयं गतो भवतीति फलश्रुतिः सोऽकामयतेत्याद्यर्थवादः। असन्ने

प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिरुपपत्तिः तत्र यथा हे सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं
विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादौ द्वितीयवस्तुसाधने विकारस्य वाचारंभणमात्रत्वे युक्तिरुपपत्तिः श्रूयते। मननं तु श्रु
तस्याद्वितीयवस्तुनो वेदांतार्थानुगुणयुक्तिभिरनवरत[मन]मनुचिंतनं।

८ व स भवति असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेद संतमेनं ततो विदुरिति को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यादि
त्याद्युपपत्तिः तथा मुंडके च अथ परा यया तदक्षरमधिगम्यत इत्याद्युपक्रमः ब्रह्मैवेदममृतं पुरस्तादित्युपसंहारः येनाक्षरं पुरु
षं वेद सत्यं तदेतदक्षरं ब्रह्म तमेवैकं जानीथ आत्मानमित्याद्यभ्यासः। न चक्षुषा गृह्यते नापि वाचेत्यारभ्य वेदांतविज्ञा
न सुनिश्चितार्था इत्यंते नापूर्वता सूचनं। निरंजनः परमं साम्यमुपैति ब्रह्म वेद ब्रह्मैव भवतीति फलश्रुतिः यथा सुदीप्तात्पाव
कात् विस्फुलिंगा इत्याद्यर्थवादः। कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति इति एकविज्ञानेन सर्वविज्ञानप्रतिज्ञारूपाद्युपप
त्तिः एवं एतरेयादिष्वपि शाखांतरेषु उपक्र[मा]द्यूहनीयं। मननं लक्षयति। मननं त्विति। केवलपुरुषबुद्ध्युत्प्रेक्षितशुष्कतर्कव्यावृत्त्यर्थं ४३

वेदांतार्थानुगुणेति विशेषणं। आर्षं धर्मोपदेशं च

वेदशास्त्राविरोधिना यस्तर्केणानुसंधत्ते स धर्मं वेद नेतर इति स्मृतेः। अत्र धर्मशब्दो ब्रह्मणोऽप्युपलक्षणार्थः अनवरतं पदं मननस्यावश्य कत्वद्योतनार्थं। निदिध्यासनलक्षणमाह। विजातीयेति। चित्तस्य ज्ञेयालम्बनानिश्चलत्वावस्थानं समाधिस्तं विभज्य लक्षयति समाधिरित्या दिना। सविकल्पकः संप्रज्ञातसमाधिः निर्विकल्पकोऽसंप्रज्ञातसमाधिरिति सांप्रदायिकी संज्ञा द्रष्टव्या। तत्रेत्युद्दिष्टसमाधिद्वयं सप्तम्यर्थः। ज्ञाता ज्ञानं ज्ञेयं चेति यो विकल्पो विभागोल्लेखस्तस्य लयोऽभावस्तदनपेक्षया ज्ञात्रादिविकल्पोल्लेखपूर्वकमिति यावत्। अद्वितीयेति छेदः। सविकल्पकसमाधिलक्षणार्थमुदाहरणेन प्रलापयति। तदा मृदिति। यथा मृद्विकारे गजे कुंभकारादिनिर्मिते गजोयमित्यस्यां बुद्धौ गजाकारोल्लेखेपि मृन्मात्रमेव सत्यं भासते गजाकारस्य मिथ्यात्वनिश्चयात्। एवं ब्रह्माकारायां वृत्तौ ज्ञा

विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुनि सजातीयप्रत्ययप्रवाहो निदिध्यासनं। समाधिर्द्विविधः सविकल्पो निर्विकल्पकश्च। तत्र सविकल्पो नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानं। तदा मृन्मयगजादिभानेपि मृद्भानवत् द्वैतभानेप्यद्वैतवस्तु भासते। तदुक्तमभिनीयदृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरं। अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्तमोम् इति।

त्राद्याकारे उल्लिख्यमानेपि ब्रह्मैव सत्यं भासते न ज्ञात्रादिविकल्प इत्यर्थः। कथं तत्र ब्रह्म भासते इत्यपेक्षायां पूर्वाचार्यसंमत्युदाहरणेन तत्स्वरूपमाह। तदुक्तमभिनीयेति। अभिनयमंगचेष्टाविशेषं कृत्वेत्यर्थः। दृशिस्वरूपं चैतन्यघनं विज्ञानघन एवेत्यादिश्रुतेः। गगनोपमं सर्वगतं आकाशवत्सर्वगतश्चेति श्रुतेः। परं मायातीतं। अक्षरात्परतः पर इत्यादिश्रुतेः। सकृद्विभातं एकदैव कृत्स्नमभिव्यक्तं सकृद्विभातो ह्येवास्मै भवतीत्यादिश्रुतेः। तुशब्दः पादपूरणार्थः। अजं जन्मादिविकारशून्यं न जायते म्रियते वा विपश्चिदित्यादिश्रुतेः। एकं सजातीयविजातीयशून्यं एको देव एकं संत

वे॰सा॰
टी॰ ५४

वहुधा कल्पयंतीति श्रुतेः। अक्षरं कूटस्थं नित्यं येनाक्षरं पुरुषं वेद सत्यमिति श्रुतेः अलेपकं निरवद्यं निरंजनमिति श्रुतेः सर्वगतं स
वोनु स्यूतस्तन्मात्रं यस्मिन्द्यौः पृथिवी चांतरिक्षमोतमित्यादि श्रुति श्रुतेः यदद्वयं स्वगतभेदशून्यं अशब्दमस्पर्शरूपमित्यादि श्रुतेः
तदेव चाहमस्मि अहं ब्रह्मास्मीति श्रुतेः अतो हं सततं सर्वदैव विमुक्तो न कदापि बद्धः विमुक्तश्च विमुच्यत इति श्रुतेः इति श्लोका
र्थः। निर्विकल्पकसमाधिं लक्षयति। निर्विकल्पकस्त्विति। अत्राप्यद्वितीय इति छेदः अतितरामेकीभावेनावस्थाने दृष्टांतः।
तदाजलेति। दृष्टांतदर्शितमर्थं दार्ष्टांतिके योजयति। अद्वितीयेति। ननु सुषुप्तेपि ज्ञातृज्ञेयज्ञानविभागानां लयसंभवात्तत्र
निर्विकल्पकसमाधिलक्षणमतिव्याप्नोतीत्यत आह। ततश्चेति। तत्र हेतुमाह। उभयत्रेति। सुषुप्तौ वुद्धिरेव नास्ति वुद्धेः कारणात्मनै

निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पभेदलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनाव
स्थानं तदा जलाकाराकारितलवणानवभासेन जलमात्रवदवद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तु
मात्रमेवभासते ततश्चास्य सुषुप्तेश्चाभेदशंका न भवति। उभयत्र वृत्त्यभावे समानेपि तत्सद्भावमात्रेण तयोर्भेदोपपत्तेः। ज्ञावां
अस्यांगानि यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयः। तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः। शौ २२

वस्थानस्य तल्लक्षणत्वात्। इह तु वुद्धिवृत्तेरद्वितीयवस्त्वाकाराकारितया अवस्थानांगीकारात्सुषुप्तेर्भेदोपपत्तेरित्यर्थः। नापि मुक्तावति
व्याप्तिः तत्राविद्यातत्कार्यसंस्काराणामत्यंतमुच्छेदादिह पुनर्व्युत्थानादिव्यवहारदर्शनेन तेषामनुवृत्तेर्दिष्टत्वात् नापि जीवन्मुक्तौ।
प्रसंगः। तस्य व्युत्थानदशायामपि वाधितानुवृत्तिमात्रप्रपंचावभासेपि स्वस्वरूपएवावस्थानात् साधकस्य वाधितानुवृत्तिमात्रप्रपंचा
वभासाभावादिति द्रष्टव्यं। उक्तनिर्विकल्पसमाधिस्वरूपोपकारकाण्यंगान्याह। अस्येति। तत्र यमानाह। तत्रेति। वाङ्मनःकायैः पर
पीडावर्जनमहिंसा सत्यं यथार्थभाषणं अस्तेयं अदत्तादानरूपपरस्वहरणराहित्यं ब्रह्मचर्यं अष्टांगमैथुनवर्जनं तथा चोक्तं स्मरणं की ५४

कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च। एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः। विपरीतं ब्रह्मचर्यं
५२ मेतदेवाष्टलक्षणमिति। अपरिग्रहः समाध्यनुष्ठानानुपयुक्तस्य वस्तुमात्रस्यासंग्रहः। नियमानाह। शौचेति। शौचं बाह्याभ्यंतरलक्षण
तदुक्तं शौचं तु द्विविधं प्रोक्तं बाह्यमभ्यंतरं तथा। मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथांतरमिति। संतोषो यदृच्छालाभसंतुष्टि
ःअलाभे चाविषादः तपः कामानशनं तपो नानशनात्परमिति श्रुतेः अनशनं च काम्यानशनमेव केचित्तु मनसश्चेंद्रियाणां चैकाग्र्यं
परमं तप इत्याद्युक्तलक्षणं तप इत्याहुः सर्वथा तु नात्र चांद्रायणादिस्तपःशब्दार्थः तस्य समाधिविरोधित्वादिति द्रष्टव्यं। स्वाध्यायः
प्रणवजप उपनिषज्जपो वा वृत्तिश्च। ओमित्येवं ध्यायथ आत्मानमन्या वाचो विमुंचथ उपनिषदमावर्त्तयेदुपनिषदमावर्त्तयेदिति श्रुतेः। ईश्व

करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीन्यासनानि रेचकपूरककुंभकलक्षणाः प्राणनिग्रहोपायाः प्राणाया
माः। इंद्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः अद्वितीयवस्तुन्यंतरिंद्रियवृत्तिधारणं धारणा। तत्राद्वितीयवस्तुनि विच्छि
द्य विच्छिद्यांतरिंद्रियवृत्तिप्रवाहो ध्यानं। समाधिस्तूक्तलक्षणः सविकल्पएव। अस्य निर्विकल्पस्यांगिनो लयविक्षेपकषायर
सास्वादलक्षणाश्चत्वारो विघ्नाः संभवंति॥

रघूत्तमानंतस्य मानसैरुपचारैरभ्यर्चितं तं हि देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमह
ं प्रपद्ये इति मंत्रलिंगात्। अथासनादीनि कथयति। करेति। स्वस्तिकादीनीत्यादिपदाद्भद्रवीरासनादिग्रहः। रेचकः प्राणवायोः शनैः वा
मनासापुटाद्दक्षिणनासापुटाद्वा सव्यापसव्यन्यायेन बहिर्निःसरणं पूरकस्तस्य तथैवांतःप्रवेशनं कुंभकस्तु पूरितस्य वायोरं
तरेव निरोध इति भेदः। समाधेर्ध्यानस्य भेदं द्योतयितुं विच्छिद्य विच्छिद्येत्युक्तं सुगममन्यत्। एवं सांगसमाधिमनुतिष्ठतो यदा
तिवृष्ट्यनावृष्टिराष्ट्रविप्लवव्याघ्रचौरज्वराद्युपद्रवविघ्नसंभावना भवति तदा तन्निवृत्तिर्लौकिकावगतसाधनावलंबनेन का
र्या यदा तु मनस्येव विघ्नाः प्रादुर्भवंति तदा तन्निवारणोपायमुपदेष्टुकामस्तत्रत्यान्विघ्नान्निर्दिशति। अस्येति॥ रामराम रामराम रामराम

वे॰सा॰ टी॰ ४५ लयादीन्विभज्य लक्षयति। लयस्तावदिति। उक्तलयादिविघ्नचतुष्टयाभावेन चित्तस्य ज्ञेयवस्तुनि यन्नैश्चल्यं तद्दृष्टांतेन निर्विकल्पकसमाधिल
क्षणमित्याह। एतदिति। विघ्ननिवृत्त्युपायं संमतिप्रदर्शनेनाह। तदुक्तमित्यादिना। लये संबोधयेत् उत्तंभयेत् सोत्साहं मनः कुर्यादि
त्यावत् विक्षिप्तं चित्तं धैर्यावलंबनेन पुनः शमयेत् पुनरद्वितीयवस्तुनिष्ठं कुर्यादित्येतत् कषायं चित्तं विजानीयात्कलुषितमे स३
४५ चित्तमिति विज्ञाय च समेऽद्वितीयचैतन्यात्मनि निवेशयेत्पुनः समप्राप्तं तन्न चालयेत्तत्रैव प्रयत्नपूर्वकं स्थिरीकुर्यादित्यर्थः
। रसं सविकल्पानंदं न स्वादयेत् तदानंदमात्रे एकतानार्थतां न मन्वीत किंतु प्रज्ञया विवेकबुद्ध्या निःसंगः सविकल्पकानंदेऽनास
ड? लयस्तावदखंडवस्त्वनवलंबनेन चित्तवृत्तेर्निद्रा अखंडवस्त्वनवलंबनेन चित्तवृत्तेरन्यावलंबनं विक्षेपः लयविक्षेपाभावेऽपि चि
त्तवृत्तेः रागादिवासनया स्तब्धीभावादखंडवस्त्वनवलंबनं कषायः अखंडवस्त्वनवलंबनेनापि चित्तवृत्तेः सविकानंदा कल्प२
स्वादो रसास्वादः समाध्यारंभसमये सविकल्पानंदास्वादनं वा। एतद्विघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदखंडचैत
न्यमात्रमवतिष्ठते यदा तदा निर्विकल्पसमाधिरुच्यते। तदुक्तं लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः। कषायं विजानीयात्समप्रा स
प्तं न चालयेत्। नास्वादयेद्रसं तत्र निःसंगः प्रज्ञया भवेदिति। यथा दीपो निवातस्थो नेंगते सोपमा स्मृतेति। अथ जीवन्मुक्तलक्षणमुच्यते। क्त१
क्तो भवेदित्यर्थः। एवं विघ्नपरिहारे सति यन्निर्विकल्पकसमाध्यवस्थानं चित्तस्य तद्भगवद्वाक्योदाहरणेन दर्शयति। यथा दीप इति। एवं
विधसमाध्यंतसाधनानुष्ठानपरिपाके सति पूर्वोक्तप्रकारेण ब्रह्मात्मैक्यसाक्षात्कारे दृढीभूतेऽविद्यातत्कार्यात्मकसा
र्वसंसारनिवृत्तौ जायमानायां काकतालीयन्यायेन यदि प्रारब्धकर्मक्षयात्तत्काल एव विदुषः शरीरपातस्तदा सद्य एव मु
क्तिः स्यात् यदा तु ज्ञानोत्पत्तिसमये प्रारब्धकर्म न क्षीयते तदा तत्क्षयपर्यंतं शरीरस्यावस्थानात् जीवन्नेव मुक्तः संसारो ४५
भवति तस्य लक्षणं वक्तुं प्रतिजानीते। अथेति। अथ शब्दः साधननिरूपणानंतर्यार्थः।

लक्षणमाह। जीवन्मुक्तो नामेति। ब्रह्मनिष्ठत्वं वेदांतवेद्यब्रह्मात्मनावस्थिततत्त्वं ब्रह्मनिष्ठो जीवन्मुक्त इत्युक्ते परमार्थब्रह्मनिष्ठ।
का २ त्वमपि मुक्तस्याप्यस्तीत्यतो विशिनष्टि। अखिलबंधरहित इति। परममुक्ते धर्मासिद्धये प्रारब्धकर्ममात्रशेष इति विशेषणांतरमध्याहृ
त्तव्यं। कथमसौ मुक्त इत्यपेक्षायामाह। अज्ञानतत्कार्येति। अज्ञानं सदसद्भ्यामनिर्वचनीयमित्याद्युक्तलक्षणं तत्कार्यं स्थूलसू
क्ष्मप्रपंचद्वयं संचितं कर्म ज्ञानोत्पत्तेः प्रागुत्पन्नमनारब्धफलं संशयो देहाद्व्यतिरिक्तो ब्रह्मस्वरूप आत्मा भवति न वेति अ
पवा ब्रह्मात्मविज्ञानान्मोक्षो भवेन्न वेत्यादिविचिकित्सा विपर्ययो देहादिष्वात्माभिमानादिलक्षणः आदिशब्दाद्दृश्यप्रपंचे
सत्यत्वबुद्धिः एतेषां बाधितत्वान्मुक्त इत्यर्थः। एतत्कदा स्यादित्यपेक्षायामाह। स्वस्वरूपाखंडब्रह्मणि साक्षात्कृते सतीति। सा

जीवन्मुक्तो नाम स्वस्वरूपाखंडब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखंडब्रह्मणि साक्षात्कृते अज्ञानतत्कार्यसंचित
कर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबंधरहितो ब्रह्मनिष्ठो भवति। भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते
चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्यादिश्रुतेश्च।

क्षात्कारे साधनमाह। स्वस्वरूपाखंडब्रह्मज्ञानेनेति। तत्त्वसाक्षात्कारानंतरं मुक्त एव भवतीत्यत्र प्रमाणमाह। भिद्यत इति। हृदयग्रंथि
रहंकारश्चिज्जडात्मकत्वाद्ग्रंथिरिव ग्रंथिः सर्वसंशया दृष्टादृष्टार्थविषया विचिकित्साः। अस्यात्मनः कर्माणि जीवन्मुक्तिपक्षे प्रारब्धव्य
तिरिक्तानि संचितानि क्रियमाणानि च। तथा च न्यायः तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति। परममुक्तिपक्षे
प्रारब्धसहितान्यपि क्षीयंते कदा तस्मिन्निष्प्रपंचे ब्रह्मात्मनि दृष्टे सति साक्षात्कृते सति कथंभूते परावरे सर्वात्मके अत्र सर्वात्मकत्ववच
नं तद्व्यतिरिक्तस्याभावपरं चौरः स्थाणुरितिवाधायां सामानाधिकरण्यविवक्षितत्वात्। परं ह्यपरो हिरण्यगर्भः सोऽवरो यस्मात्तस्मिन्परावर
इत्यथर्वणश्रुत्यर्थः। आदिपदादात्मन्येव सर्वाणि भूतानि यस्मिन्सर्वाणि भूतानीति च मंत्रद्वयमीशावास्यगतं परिगृह्यते। श्रुतेश्चेति चकाराद्ये

धोभि स्सभिद्योतिः यज्ञात्वा न पुनर्मोहं ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति इत्यादि स्मृतयः समुच्चीयंते। न च जीवन्मुक्तौ प्रमाणाभा
वस्तद्यथाहि निर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते तेतस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये इत्यादि श्रुतेः। व
प्रजहाति यदा कामान् प्रकाशं च प्रवृत्तिं चेत्यादि स्मृतेश्च प्रमाणत्वादिति द्रष्टव्यं। ननु जीवन्मुक्तो देहेंद्रियादिभिर्व्यवहरति न
वा अन्त्ये तस्य वज्ञान्नविलक्षणता द्वितीये देहस्यानुपयोगात्सद्यःपातप्रसंग इत्यत आह। अयं तिष्ठति। आरब्धफलानि भुज्यमानानि पूर्व
पूर्ववासनया क्रियमाणानि च कर्माणि साक्षितया कर्तृत्वभोक्तृत्वाभिमानहीनो न्यद्दृष्ट्या पश्यन्निव भासमानोऽपि परमार्थतः स्वदृष्ट्या न प

अयं तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेणांध्यमांद्यापटुत्वादिभाजनेनेंद्रियग्रामेणाशनपिपासाशोकमोहादिभा
जनेनांतःकरणेन च पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धारब्धफलानि च पश्यन्नपि वाधितत्वात्परमा
र्थतो न पश्यति। यथेंद्रजालमिति ज्ञानवान् तदिदमिंद्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति। सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव समवा च
गवागिव समना अमना इव सप्राणोऽप्राण इव इत्यादि श्रुतेः। तदुक्तं सुषुप्तवज्जाग्रति यो न पश्यति द्वयं च पश्यन्नपि चाद्वयत्वतः
तथा च कुर्वन्नपि निःक्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः इति।

एषतिष्ठतीत्यनेन कर्तृत्वाद्यभिमानमूलाज्ञानस्य वाधितत्वा
द्व्याद्विलक्षण एवायमित्यर्थः। वल्लवत्समुक्तबाणपाषाणादिवत्प्रवृत्तफलस्य कर्मणो यावद्वेगक्षयं निवारकाभावात्तदधीनदेहस्य न
सद्यःपातप्रसंग इति द्रष्टव्यं। उक्तमर्थं दृष्टांतेन स्पष्टयति। यथेंद्रजालमिति। वाधिततत्त्वबुद्धेरनुवृत्तेरित्यर्थः। जीवन्मुक्तो देहादि
भिर्व्यवहरन्निव दृश्यमानोऽपि न परमार्थतो व्यवहरतीत्यत्र श्रुतिं प्रमाणयति। सचक्षुरचक्षुरिवेति। चक्षुरादिमानपि प्रपंचरूपा च
द्यदर्शनाच्चक्षुरादिहीन इव भवतीत्यर्थः। आदिपदात्तदेजति तन्नैजति इत्युत्तरग्रहः। उक्तेर्थे पूर्वाचार्यसंमतिमाह तदुक्तंसुषुप्तव ह
दिति जाग्रति जाग्रदवस्थायां द्वयं पश्यन्नपि यः सुषुप्तिगतवद्विशेषतो न पश्यति स आत्मवित् विशेषादर्शने हेतुरद्वयत्वमिति। त त ४६

यस्य बाधितत्वादित्यर्थः। तथा कुर्वन्नपि न करोतीति यतो निःक्रिय इति योजना। तथा च वशिष्ठः सुषुप्तवद्यश्चरति स मुक्त इति कथ्यत इ
ति। नन्वसौ जीवन्मुक्त इति कथमन्यैर्ज्ञायत इति तदाह। असक्तानात्पूर्वमिति। अशुभवासनानां साधकावस्थायामेव निवृत्तत्वाच्छु
भवासनानामेवानुवृत्तिर्भवतीत्यर्थः। ननु शास्त्रविहितं शुभमेवाचरतो न साधकाद्भेद इत्यपरितुष्यन्निवाह। शुभाशुभयोरौदासीन्य
वेति। औदासीन्यमुपेक्षा हि सानुग्रहयोरनारंभ इति गौतमस्मरणात् निराशिषमनारंभं निर्नमस्कारमस्तुतिं अक्षीणं क्षीणकर्माणं तं दे
वा ब्राह्मणं विदुरिति व्यासवचनात्। अमौनं मौनं च निर्विद्याथ ब्राह्मण इति बृहदारण्यकश्रुतेश्च तथा चौदासीन्यमेव मुक्तलक्षणं न विधिप
रतंत्रा प्रवृत्तिमत्त्वं न वा निषेधातिक्रम इति भावः। विधिनिषेधशास्त्रपरवशत्वं चेन्मुक्तस्य न भवेत्तर्हि यथेष्टाचरणं प्राप्नोतीत्याशंक्य नैष्कर्म्यसिद्धि

असक्तानात्पूर्वं विद्यमानैर्नामेव आहारविहारादीनामनुवृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति। शुभाशुभयोरौदासीन्यं वा तदु
क्तं बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतर इ
ति। तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः सद्गुणाश्चालंकारवदनुवर्त्तंते।

वाक्येन प्रत्याचष्टे। तदुक्तं बुद्धेति। सतत्त्वा

र्थात्स्य मुमुक्षोरपि नास्ति यथेष्टचेष्टा विदुषो मुक्तस्य कुत एव सा तदप्युक्तं यो हि यत्र विरक्तः स्यान्नासौ तस्मिन्प्रवर्त्तते लोकत्रया
द्विरक्तत्वान्मुमुक्षुः किमितीहते क्षुधयापीड्यमानोपि न विषं ह्यत्तुमिच्छति मिष्टान्नध्वस्तत्तृड् जानन्नामूढस्तज्जिघत्सतीति रागो
लिंगमबोधस्य चित्तव्यायामभूमिषु कुतः शाद्वलता तस्य यस्याग्निः कोटरे तरोरित्यादि। नन्वविद्याकार्यत्वाद्यथेष्टचेष्टायाश्च
विद्यानिवृत्त्या निवृत्तिवदमानित्वादीनामद्वेष्टृत्वादीनामप्यविद्याकार्यत्वाविशेषान्निवृत्तिरेव स्यान्नानुवृत्तिरित्याशंक्य नियो
गवशादनुवृत्तस्य भावेपि निवृत्तिशास्त्राविरुद्धस्वभावत्वान्न निवर्त्तेरन्निति दर्शयति। तदानीमिति।

वे॰ सा॰ ४७

47

तत्रापि नैष्कर्म्यसिद्धिमुदाहरति। तदुक्तमुत्पन्नेति। इदानीं मुक्तं जीवन्मुक्तमनूद्य तस्य परममुक्तिं दर्शयति। किं बहुनेति। देहयात्रादेह
स्थितिस्तन्मात्रार्थं न त्विंद्रियप्रीत्यर्थं सुखदुःखलक्षणानि सुखदुःखसाधनानि प्रारब्धफलानि भोग्यानि अनुभवन्न संग(
तयाभुंजानः कथं भुंजान इत्युच्यते अन्तःकरणाभासादीनां विषयाकारवृत्तीनां साक्षितयावभासकः सन्निति। यावत् तदवसाने तत्कार्य
प्रारब्धफलभोगावसाने जाते प्राणप्रयाणाभावात् प्राणे ब्रह्मणि विलीने सति पूर्वसिद्धज्ञानेनैव प्रारब्धकर्मादिनाशाज्ज्ञाने ततत्सं
स्काराणामपि विनाशात् संचितकर्मणां ज्ञानेन दाहात् क्रियमाणानामसंश्लेषात्तु न देहान्तरहेतुत्वमभावात् परमकैवल्येत्यादिनोक्तं ब्रह्म(
स्वरूपेणावतिष्ठते विद्वानित्यर्थः। निर्गुणब्रह्मसाक्षात्कारवतः प्राणा नोत्क्रामन्ति किंतु प्रत्यग्ब्रह्मण्येव तप्तायःपीताम्बुवद्विलीयन्त इत्यत्र

तदुक्तमुत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः अयत्नतो भवन्त्यस्य न तु साधनरूपिण इति। किं बहुनायं देहयात्रार्थमिच्छानिच्छापरेच्छाप्रा ह
पितानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः सन् तदवसाने प्रत्यगानन्दपरे ब्रह्मणि प्राणे ली
नेसत्यज्ञानतत्कार्यसंस्काराणामपि विनाशात् परमकैवल्यमानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डब्रह्मावतिष्ठते। न तस्य प्रा सारः
व णा उत्क्रामन्त्यत्रैव समवलीयन्ते। विमुक्तश्च विमुच्यत इत्यादिश्रुतेः। इति श्रीपरमहंसपरिव्राजकाचार्यसदानन्दविरचितो वेदान्तसारः समाप्तः॥

प्रमाणमाह न तस्येति। मुक्तेरसाध्यत्वे काठकश्रुतिं प्रमाणयति। विमुक्तश्च विमुच्यत इति। पूर्वमपि मुक्त एव सन्नविद्याप्रत्युपस्थापितनाम
न रूपोपाध्यविवेकनिबन्धनस्य संसाराभासस्य नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयप्रत्यग्ब्रह्मरूपोऽहमस्मीत्यपरोक्षज्ञानाद्विलया(
वेद्यया विमुच्यत इत्यर्थः। वस्तुतस्तु न बन्धो न मोक्षः। तथा च श्रुतिः। न निरोधो न चोत्पत्तिर्न बन्धो न च साधकः। न मुमुक्षुर्न वै मु(
क्त इत्येषा परमार्थतेत्याद्या॥ विद्यासीतावियोगक्षुभितनिजसुखः शोकमोहाभिपन्नस्ततः सौमित्रिमित्रो भवगहनगतः शास्त्र
सुग्रीवसख्यः हत्वास्ते दैन्यवालिं मदनजलनिधिं धैर्यसेतुं प्रबध्य प्रध्वस्ताबोधरक्षः पतिरधिगतचिज्जानकिः स्वात्मारामः॥ वे
दान्तसारविवृतिं रामतीर्थाभिधो यतिः। चक्रे श्रीकृष्णतीर्थश्रीपदपंकजषट्पदः॥ इति श्रीवेदान्तसारटीका विद्वन्मनोरंजनी समाप्ता॥ श्रीः॥ ४७